P
2862

॥ श्रीरस्तु ॥

# संस्कृतकथासप्ततिः

836

श्रीमन्महीशूर महाराजास्थानपण्डितेन महाराजा-
कालेज् संस्कृत मुख्यपण्डितेन च T 260

**मण्डिकल् रामशास्त्रिणा**

विरचिता.

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रिता च

सन् 1914

(All Right Reserved.)

Price 5 As. | मूल्यं ।÷ पञ्चकलाः

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
BANGALORE

Accn. No. 836

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

Class and No. 7. ~~83~~ 26

1615-36

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

CHAMARAJENDRA SANSKRIT COLLEGE
~~IX 7.1~~
चामराजेन्द्र संस्कृत पाठशाला
~~1025~~
BANGALORE

"ಸಂಸ್ಕೃತಕಥಾಸಪ್ತತಿ"

T 260

Accn 836

P-9862

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ

# पीठिका.

श्रीमन्महीमण्डलमण्डनायमाने अस्मिन् कर्णाटदेशे कथासप्ततिरियं कर्णाटभाषात्मना लिखितैवासीत्. अत्र कथास्सर्वास्सरसाः नीतिबोधकाश्च सन्दृश्यन्ते. संस्कृतवाक्यग्रन्थेषु कादम्बर्याद्युद्ग्रन्थसत्त्वेपि एवं नीतिबोधकस्य सुलभमार्गेण व्युत्पादकस्य च कस्यापि वाक्यग्रन्थस्याभावात् अयमेव ग्रन्थः संस्कृतभाषयापि निरूपितश्चेत् गीर्वाणभाषाव्युत्पित्सूनां बालानां बालिकानां च बहुशः पदपरिचय सुखबोधन मानसोल्लासनादि द्वारा स्वयमत्यन्तोपयोगी स्यादित्यालोच्याहं प्रौढतरान्प्रयोगान्विहाय सुलभमार्गेण इमं ग्रन्थमलिखं. तत्र तत्र कथानुगुण्येन कश्चित्कश्चिद्विशेषसन्दर्भोप्यलेखि. कासांचित्कथानामुपरिभागे तदनुरूपानू प्राचीनानां श्लोकानेवालिखम्. अन्यत्र स्वनिर्मितानेव तानलिखम्. स्वनिर्मितानां आदौ *इदं चिह्नं निवेशितम्.

अत्र ग्रन्थे यः कोपि दोषः सन्दृश्यते चेत् तदिदं पुस्तकं आलोकयन्तो महान्तः तं समीकृत्य मां बोधयन्तो मम दयेरन्निति भूयोभूयस्सम्प्रार्थये.

मण्डकल् **रामशास्त्री,**

महीशूरपुरस्थितचामराजाग्रहारस्थः.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

# विषयसूचिका ।

कथा—


१ पण्डितस्य तत्पुत्रयोश्च कथा.
२ द्वयो र्बालयो श्चूततरोश्च कथा.
३ बालानां भेकानां च कथा.
४ अनृतवादि बालकस्य कथा.
५ द्वयो र्बालयोः वनपालकस्य च कथा.
६ मनुष्य वृश्चिकयोः कथा.
७ शूद्रस्य तत्नीलशुनकस्य च कथा.
८ दुष्प्रभु कवीश्वरयोः कथा.
९ राजनिम्बबीजयोः कथा.
१० कपि तत्प्रतिबिम्बयोः कथा.
११ शूद्रस्य तन्महिष्याश्च कथा.
१२ व्याघ्रस्य वनमृगाणां च कथा.
१३ काष्ठविक्रयिणस्तिन्त्रिणीतरोश्च कथा.
१४ बोधकस्य विद्याभिलाषि बालकस्य च कथा.
१५ जनाधिपतिज्यौतिषिकयोः कथा.
१६ मूढकुशलयोः कथा.
१७ रजकतद्रासभयोः कथा.
१८ मार्जारजम्बुकयोः कथा.
१९ बालतस्करयोः कथा.
२० व्याघ्रकाक कथा.
२१ हौणप्रभुतत्सेवकयोः कथा.
२२ शूद्रस्य तद्वानराजयोश्च कथा.
२३ तुरुष्कप्राड्विवाकयोः कथा.
२४ शूद्रीनकुलयोः कथा.
२५ राज्ञस्तद्दुष्पुत्रस्य च कथा.
२६ ब्राह्मणव्याघ्रयोः कथा.
२७ शुकवानर कथा.
२८ तेन्नाल रामकृष्णकृत चोरवञ्चन कथा.
२९ महम्मत्सुल्तानस्तन्मन्त्रिणश्च कथा.
३० सिंहस्य वन्यमृगाणां च कथा.
३१ ब्राह्मण ब्राह्मणपुत्रयोः कथा.
३२ राज्ञस्तदाश्रितयो र्ब्राह्मणतुरुष्कयोश्च कथा.
३३ दरिद्रब्राह्मण कथा.
३४ रुग्णबधिरयोः कथा
३५ परोत्कर्षासहिष्णुब्राह्मण कथा.
३६ विधवाप्राड्विवाक कथा.
३७ वणिजस्तद्दुस्सेवकस्य च कथा.
३८ राजरजकयोः कथा.
३९ काकहंसयोः कथा.
४० द्वयोः कुविन्दयोः कथा.
४१ वृद्धायाः पौराणां च कथा.
४२ गृहस्थस्यातिथेश्च कथा.
४३ द्वयोर्वणिजोर्न्यायाधिपतेश्च कथा.
४४ सहोदरयोः पलिक्न्याः प्राड्विवाकस्य च कथा.
४५ कृपणयोः कथा.
४६ राज्ञस्तत्कुमारत्रयस्य च कथा.


Digitised by Ajit Gargeshwari For Karnataka Samskrita University

४७ रजकरासभयोश्शुनकस्य च कथा.
४८ राज्ञः कीर्तिकामतत्पुत्रस्य च कथा.
४९ राजतापसयोः कथा.
५० राजमल्लयोः कथा.
५१ अधीश्वरस्य तत्सामन्तसचिवयोश्च कथा.
५२ काकमयूर कथा.
५३ तेन्नालरामकृष्णस्य रजकस्य च कथा.
५४ शूद्रैर्वञ्चित ब्राह्मण कथा.
५५ परस्पर वञ्चितयोः शूद्रयोः कथा.
५६ बकमत्स्य कथा.
५७ ब्राह्मणस्य व्याघ्रहरिणानां च कथा.
५८ तेन्नालरामकृष्णस्य राजसेवकयोश्च कथा.
५९ गजगोमायु कथा.
६० मत्स्यत्रय कथा.
६१ अवग्रहग्रस्तबकमीन कथा.
६२ वणिक्पुत्र कथा.
६३ पृथगध्यापित शुकशाबकयोः कथा.
६४ राज्ञस्तदाप्त पण्डितस्य च कथा.
६५ पराजितराजतन्मन्त्रिणोः कथा.
६६ हंसबकयोः कथा.
६७ जम्बुककुक्कुटयोः कथा.
६८ तेन्नालरामकृष्णस्य ब्राह्मणानां च कथा.
६९ तेन्नालरामकृष्णस्य राजदौवारिकाणां च कथा.
७० रजकीगायकयोः कथा.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



Mandikal Ramasastry, Author.

श्रीरस्तु.

# संस्कृतकथासप्ततिः.

* कृतनतजनताभरणं श्रुतिततिसुदतीशिरोधृताभरणम् ।
शरणं भवभयतरणं भजदघहरणं भजामि हरिचरणम् ॥ १ ॥

## १. पण्डितस्य तत्पुत्रयोश्च कथा

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम् ॥

काश्यां कश्चिद्विद्वान् अवर्तत. तस्य द्वौ पुत्रावास्ताम्. स ज्येष्ठपुत्राय स्वीयं सर्वं धनमपि ददौ. कनिष्ठं सम्यग्विद्यानिपुणमकरोत्. ज्यायान् केषुचिद्दिनेषु सर्वस्वमपि व्यययित्वा दरिद्रोऽभवत्. कनीयान् स्वपाण्डित्येन बहुलं द्रव्यं सम्पाद्य सुखेनावर्तत. तस्माद्विद्यावानेव सुखी भवति.

21 6/32

## २. द्वयोर्बालयोश्चूततरोश्च कथा.

धैर्यात्सुखमवाप्नोति धैर्येणापन्निवार्यते ।
धैर्येण प्राप्यते लक्ष्मीः धैर्यं सर्वत्र साधनम् ॥

कस्मिंश्चित् ग्रामे कश्चन बालः आसीत्. स

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कश्चिदारामं प्राप्य तत्र कस्य चित् रसालवृक्षस्योपरि उत्तमं फलमपश्यत्. तदपचित्य भक्षयेयमित्यपेक्ष्य अपचेतुमयतत. तं वृक्षं परितः कण्टकवृतिर्वर्तते स्म. स तस्याः भीत्वा फलमनपचित्यैव गृहं जगाम. तदा अन्यो बालस्तत्फलमालोक्य परितस्स्थितायाः कण्टकवृतेरसन्त्रास्य तं वृक्षमारुह्य फलमपचित्याभक्षयत्. तस्माद्धैर्यवतामेव कार्यसिद्धिर्भवति.

### ३. बालानां भेकानां च कथा.

प्राणा यथाऽत्मनोऽन्येषां भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥

कस्मिंश्चिद्दिवसे केचित् बालाः कस्यचित्तटाकवारिवारणस्योपरि क्रीडन्तस्सन्तः तटाके विद्यमानान्भेकान्निरीक्ष्य विनोदार्थं पाषाणैः प्रहरन्ति स्म. ततस्तेष्वेको मण्डूकः तान्पृथुकान्वीक्ष्य, हे बालाः, अश्मभिरस्मत्प्रहरणं युष्माकं विहारायते, अस्माकं तु प्राणहानिं जनयतीति तान्निनिन्द. तस्माद्विनोदार्थमपि हिंसाकरं कर्म न कर्तव्यम्.



### ४. अनृतवादिबालकस्य कथा.

अनृतं न वदेत्प्राज्ञः प्राणैः कण्ठगतैरपि ।
नानृतादपरा हानिः नानृतात्पातकं परम् ॥

कस्मिंश्चिदग्रहारे कश्चित् ब्राह्मणो वसति स्म. तस्य एकः कुमारः आस्त. स तेन कुमारेण सह कश्चिद्ग्रामं प्रति प्रतस्थे. मार्गे स बालः तात, व्याघ्रस्समायासीद्व्याघ्रस्समायासीदिति मृषैव चुक्रोश. तदा पिता परावृत्य ददर्श. तत्र व्याघ्रो, नैवावर्तत. पितरि पुरतः किञ्चिद्दूरं गतवति सति शार्दूलस्सत्यमागत्य तं बालं जग्राह. तदा सः व्याघ्रस्समायासीदिति पुनर्व्याहरति स्म. तत्तातस्तु अयं पूर्ववन्मिथ्या वदतीति मनसि निश्चित्य अपरावर्तमान एव जगाम. तस्मादनृतवादिभिः कदाचित् सत्यमुक्तमपि जनास्तत् न प्रतियन्ति.

### ५. द्वयोर्बालकयोः वनपालकस्य च कथा.

खलः करोति दुर्वृत्तं सङ्गात्फलति साधुषु ।
दशाननोऽहरत्सीतां बन्धोऽभूद्दक्षिणोदधेः ॥

कस्मिंश्चिद्दिवसे द्वौ बालौ किञ्चिदुद्यानमगमताम्. तयोरेको बालः कस्य चित् वृक्षस्योपरि समीचीनानि

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

फलानि दृष्ट्वा अपचेतुमैच्छत्. तदा द्वितीयः फलानि मापचिनु, औद्यानिकः पश्येद्यदि ताडयिष्यतीत्यवदत्. सः तस्य वचनमनादृत्यैव तरुमारुह्य फलान्यपाचिनोत्. तावदेव स औद्यानिकस्समागत्य फलानि किमर्थमपाचिनोः इत्युक्त्वा तं जग्राह. स बालस्तु इमानि नाहमपाचिनवं, अयमपचित्य मम हस्ते अदात्, इति स्वस्य सद्बुद्धिमुपदिष्टवन्तं सखायमदर्शयत्. स औद्यानिकस्तं गृहीत्वा अदण्डयत्. तस्मात् दुर्जनसङ्गो न कर्तव्यः.

### ६. मनुष्यवृश्चिकयोः कथा.

उपकर्तुरपि क्रूरस्त्वपकारं प्रकल्पयेत् ।
होतारमप्यनालोच्य दहत्येव हि पावकः ॥

कश्चित्पुमान् अग्नौ पतन्तं कञ्चित् वृश्चिकमालोक्य अस्मिन् रक्षिते सति ममातीव पुण्यं भवेदित्यालोच्य तमपतन्तमेव जग्राह. स वृश्चिकः तमुपकारमनालोच्य तस्य हस्तं अ*लशूकेनावृश्चत्. स तस्मादतीवाखिद्यत. तस्मात्क्रूरस्य नोपकर्तव्यम्.

* अलं 'वृश्चिकलाङ्गूलं' इति हलायुधः.



### ७. शूद्रस्य तन्नीलशुनकस्य च कथा.

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च कार्याणि नारभेत विचक्षणः ॥

कस्य चित् शूद्रस्य निकटे कश्चित् नीलशुनकोऽवर्तत. स तं धवलीकरोमीति नदीं प्रापय्य बहून् दिवसान् क्षालयन्नासीत्. नितरां क्षालितोपि स श्वा न श्वेतीबभूव. तस्मादसाध्ये कार्ये न यतितव्यम्.

### ८. दुष्प्रभुकवीश्वरयोः कथा.

नीचः पूज्यपदस्थोपि स्वनीचत्वं न मुञ्चति ।
देवताकृतिमेत्यापि न काठिन्यं त्यजेच्छिला ॥

कश्चिच्चोरः कस्यचित्पत्तनस्य राजा अभवत्. तदा कश्चित्कवीश्वरस्तत्समीपमागत्य तद्विषये कानिचित्पद्यानि उक्त्वा स्वस्य किमपि पारितोषिकं दापयेत्ययाचत. तदा सः समीपस्थितानालोक्य अस्य कवीश्वरस्य उत्तरीयपटानपहृत्य एनं निष्कासयतेत्याज्ञापयामास. ते तथैव तस्य पटान्सर्वानपि हृत्वा तं निरकासयन्. एवं नीचाः महाधिकारे प्राप्तेपि स्वीयां नीचबुद्धिं न त्यजन्ति.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## ९. राजनिम्बबीजयोः कथा.

कर्पूरधूलीकलितालवालः कस्तूरिकाकल्पितदोहदश्रीः ।
गन्धोदपूरैः परिषिच्यमानः प्राञ्चं गुणं मुञ्चति किं पलाण्डुः ॥

कश्चिद्राजा निम्बबीजमानीय निजारामे शर्करया आलवालं कारयित्वा तस्मिंस्तद्बीजमुप्त्वा यावत्तदङ्कुरीभूय प्रवर्धेत तावत् क्षीरैर्निषिञ्चन् ररक्ष. तत्प्रवृद्ध्यनन्तरं स वृक्षः पुष्पैः शलाटुकैश्शलाटुभिश्च पूर्णोभूत्. ते शलाटवः मधुरास्सन्तो वर्तेरन्निति मनसि चिन्तयन्नेकं शलाटुमानाय्य चखाद. स परं तिक्त एवासीत्. न मधुरायतेस्म. तस्मात् एवं दुर्जनाः आबाल्यात् सत्सङ्गवन्तोपि स्वीयं दुर्गुणं न मुञ्चन्ति.

## १०. कपितत्प्रतिबिम्बयोः कथा.

परस्वहरणेच्छादि स्वीयमर्थं विलुम्पति ।
दुराशया कपिः कोपि लब्धं फलमनाशयत् ॥

कश्चिद्वानरः कूपसमीपे उपविश्य आम्रफलमदन् आनम्य कूपस्य अन्तर्भागमालोक्य जले स्वप्रतिबिम्बमपश्यत्. तन्निरीक्ष्य अन्तरन्यः कोपि कपिः चूतफलमत्ति, तं सन्तर्ज्य तत्फलमपहरिष्यामीति लोभेनोच्चैर्जगर्ज

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



तेन वदने स्थितं तत्फलं कूपे पतित्वा ममज्ज. ततः कपिरतीवाखिद्यत. तस्मात्परस्वमपेक्ष्यते चेत् स्वद्रव्यमेव नश्यति.

## ११. शूद्रस्य तन्महिष्याश्च कथा.

* यस्मादत्याशया युक्तस्स विवेकेन हीयते ।
स्वहानिं परहानिं वा न पश्यति च सत्वरः ॥

कस्यचिच्छूद्रस्य निकटे काचिन्महिषी अवर्तत. सा प्रतिदिनमेकमानक्षीरं ददत्यासीत्. स तत्पयः काचाष्टकाय विक्रीणानः तेन जीवन्नासीत्. एवं स्थिते स कस्मिंश्चित् दिने आलोचयत्, अनया कासर्या दीयमानं दुग्धं विक्रीतं चेत् अष्टौ काचाः प्राप्यन्ते खलु, अनेनाहं भाग्यवान्न भवेयं, तस्मादस्याः ऊधश्छित्वा अन्तस्थं दुग्धं सर्वमपि एकदैव विक्रीणे यदि तदा ऐश्वर्यवान्भवेयमिति. अथ तेन महिष्याः ऊधसि निकृत्य दृष्टे सति अन्तः रक्तमांसानि विना नान्यत् किञ्चिद्वर्तते स्म. ततस्स्वरक्षिणी महिषी अम्रियतेति स बहुधा शुशोच. तस्मादत्याशा कृता चेन्मूलहानिरेव भवेत्.

### १२. व्याघ्रस्य वनमृगाणां च कथा.

बहुभिर्न विरोद्धव्यं दुर्बलैरपि धीमता ।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥

कस्मिंश्चिदरण्ये कश्चिद्व्याघ्रोऽवर्तत. स तत्रत्यान् मृगानगणयन् बाधमान आसीत्. एवं स्थिते कस्मिंश्चिद्दिने स व्याघ्रः एकमृषभमालोक्य तमुद्दिश्योत्पपात. तदा दैववशाल्लक्ष्यात् स्खलित्वा पुरतः स्थिते अगाधे गर्ते पपात. पतितं तं शार्दूलमालोक्य मृगास्सर्वे सङ्घीभूय अस्मिन्काले एनं न संहरामो यदि एष पुनरस्मान् बाधेतैव, तस्मादिदानीमेवायं संहर्तव्यः इत्यालोच्य सर्वेप्येकैकं पाषाणमुद्धृत्य व्याघ्रस्योपर्यपातयन्. तैस्स गर्तः पुपूरे. स व्याघ्रस्तत्रैवाम्रियत. तस्मादतिबलवानपि बहुभिर्विरोधं न कुर्वीत.

### १३. काष्ठविक्रयिणस्तिन्त्रिणीतरोश्च कथा.

* कारुण्याद्वा भयाद्वापि शत्रुषूपकरोति यः ।
स तेभ्यो हानिमाप्नोति तिन्त्रिणी वृषलादिव ॥

कश्चिच्छूद्रः कञ्चित्परशुं निर्माप्य तस्मिन् समीचीनो दण्डस्सम्पाद्य योजनीय इत्यालोच्य काननमगमत्.



ततस्तत्रत्येषु तरुषु का वा शाखा अनुकूला वर्तेतेति पश्यन्नासीत्. कश्चित् तिन्त्रिणीतरुस्तं दृष्ट्वा तत्र किमभीष्टमित्यपृच्छत्. सः मम बाहुप्रमाणो दण्डोऽभीप्सितः इत्यवदत्. स शाखी तवाभीष्टमेतावदेव किम् इत्युक्त्वा स्वशाखासु तदभीप्सितामेकामदात्. स तां सन्तक्ष्य स्वपरशौ संयोज्य तं तिन्त्रिणीतरुं अन्यानारण्यान् वृक्षानपि छित्वा विक्रेतुमयतत. तस्माच्छत्रूणामुपकारः कृतश्चेत् स स्वापकारायैव भवेत्.

### १४. बोधकस्य विद्याभिलाषिबालकस्य च कथा.

* निपुणानामाबाल्यात्प्रतिभाः काले स्वतस्स्फुरन्त्येव ।
नहि कोपि कोकिलानां पञ्चमरागान् कदाप्युपादिशति ॥

काञ्चीपुर्यां कश्चिद्विद्वानवर्तत. स बहूनध्यापयन् तेन जीवन्नासीत्. कस्मिंश्चिद्दिवसे कश्चिद्बालस्तदन्तिकमेत्य हे आर्याः. मम विद्या अभ्यसनीयेत्यपेक्षा अतीव वर्तते, तस्माद्यूयं विद्यामुपदिशतेति प्रार्थयामास. स विद्वान् तस्य बालकस्य प्रतिभां पश्यामि इत्यालोच्य अये बालक, देवः कुत्रास्तीत्यपृच्छत्. स ... स्थलं प्रथमतः यूयमावेदयथ यदि,

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ततोऽहं विज्ञापयिष्यामीत्यकथयत्. स विद्वान् तस्य बालकस्य वचनमाकर्ण्य अयमतिबुद्धिमानित्यालोच्य तदपेक्षानुसारं तस्मै विद्यामुपदिदेश. एवं बुद्धिमतामाबाल्याद्युक्तयस्स्फुरन्ति.

### १५. जनाधिपतिज्यौतिषिकयोः कथा.

आदौ ज्यौतिषिकान्प्रणम्य भुजयोरास्फाल्य पौराणिकान्
आलिङ्ग्याथ कवीन्प्रसाद्य भिषजस्सम्मान्य कायस्थकान् ।
स्पृष्ट्वा वारवधूः प्रशस्य रजकान् स्तुत्वा वणिक्सन्ततिं
प्रस्थायाथ सुवर्णकारसदने सानन्दमास्तेऽनृतम् ।

अङ्गदेशे कश्चिद्राजा अविद्यत. तस्य समीपं प्रति प्रतिदिनमल्पज्ञः एको ज्यौतिषिकः आगच्छन्नासीत्. एवं-स्थिते कस्मिंश्चिद्दिने स महीपतिरेनं कार्तान्तिकमालोक्य अहं कियन्तं कालं जीवेयं वदेत्यपृच्छत्. सः अये यूयं इतोवत्सरद्वयाधिकं न जीविष्यथेत्यवदत्. राजा एतद्वचः श्रुत्वा नितरां व्यथमानः आसीत्. तदा तत्रैव स्थितस्तदमात्यः एनं मौहूर्तिकं दृष्ट्वा राजा इतस्संवत्सरद्वयात्परं न जीविष्यतीत्यवदः किल, त्वं कतिवर्षाणि जीविष्यसि वद, इति पप्रच्छ. स स्वयमितो विंशतिवर्षाणि जीविष्या-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



मीत्यवदत्. तदा स मन्त्री स्वखड्गं विकृष्य एकेनैव प्रहारेण तस्य शिरश्छित्वा राजानं निरीक्ष्य स्वामिन्नस्य वचनं विश्वस्य कुतो बिभेषि? स्वमरणमेव स्वयमजानन् परेषां किं ब्रूयात्तस्मात्त्वं माभैषीरिति धैर्यवचनमवदत्. राजा तद्बुद्धेस्सन्तुष्य तस्य सम्मानं कारयामास. तस्मात् सम्यगज्ञात्वा वदतां वचनं न विश्वसेत्.

### १६. मूढकुशलयोः कथा.

* तत्तद्वस्तुस्वभावज्ञस्तत्फलं वेत्ति नापरः ।
महार्घाण्यपि रत्नानि पशुर्नोत्कण्ठते किल ॥

कस्याञ्चित्पल्ल्यामुभावर्भकावास्ताम्. तयोरेको मतिमान् अन्यस्त्वविवेकी. तयोरुभयोः कदाचित् किञ्चिदुद्यानमुपेयुषोस्सतोः तत्रैकं नालिकेरफलमलभ्यत. स बुद्धिमांस्तत्फलं भित्त्वा अन्तस्थं सर्वमपि स्वयमेव भक्षयित्वा पृथु तच्छुक्तिद्वयं तस्मै अविवेकिने ददौ. स ते शुक्ती शकलीकृत्य स्वमुखे न्यधात् तानि शकलानि पाषाणा इव कठिनान्यासन्. तस्मात्सः स्वसखस्स्वमवञ्चयतेति मत्वा मयाप्येष कदाचिद्वञ्चनीयः इत्यालोचयामास. कतिपयादिनानन्तरं ताभ्यामेकं चूतफलं प्रापि. तदा सोऽवि-

वेकी तत्कृतायाः वञ्चनायाः प्रतीकारः कर्तव्य इत्यालोच्य तं बुद्धिमन्तमालोक्य मद्यमन्तस्थं दत्वा उपरिस्थितं त्वं भक्षयेत्यवदत्. सोऽतीव सन्तुष्य उपरिस्थितं सर्वमपि स्वयमेव भक्षयित्वा तस्मै अन्तस्थं बीजमेवादात्. तस्मात्पदार्थस्वरूपमजानानाः एवं वञ्च्यन्ते.

## १७. रजकतद्रासभयोः कथा.

यस्स्वभावो हि यस्य स्यात्तस्यासौ दुरतिक्रमः ।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः ॥

हस्तिनापुरे विलासनाम्नो रजकस्य समीपे एकः गर्दभः अवर्तत. स पटभारान्वाहंवाहं निर्बलस्सन् उत्थातुमप्यशक्ततया पतनोन्मुखोऽवर्तत. तदा स रजकः तं व्याघ्राजिनेनाच्छाद्य उर्वरायामत्यजत्. तत्रस्थास्सर्वेपि तं दृष्ट्वा व्याघ्र इति भीत्वा पलायाम्बभूवुः. ततस्स्वल्पकालएव और्वरिकः आगत्य अस्य रीतिमालोक्य अयं न व्याघ्रायते तथापि परीक्षणीय इत्यालोच्य गर्दभचर्मवसानस्तं देशमाजगाम, सः रासभः तं दृष्ट्वा अयं स्वजातीय इति धिया विनदन्सन् तदन्तिकमनुधावति स्म. स तस्य शब्दं श्रुत्वा गर्दभ इति निश्चित्य दण्डेन ताडयि-



त्वोत्सारयामास. तस्मात् मूढानां दुर्गुणाः अतिप्रयत्नेन आच्छादिता अपि स्वत एव प्रकटीभवन्ति.

## १८. मार्जारजम्बुकयोः कथा.

* विद्या कालोचिता ज्ञेया सापायात्परिरक्षति ।
पयःप्लवनवेद्यप्सु पतित्वापि च तास्तरेत् ॥

कस्मिंश्चिद्दिवसे मार्जारः क्रोष्टा चैकत्र मिलित्वा सँल्लपन्तावास्ताम्. तदा क्रोष्टा मार्जारं दृष्ट्वा अये बिडाल, तव काचिदापदायास्यति चेत् तां परिहर्तुं कत्युपायान् जानासीत्यपृच्छत्. बिडालः अहमेकमेवोपायं जानामि, तेनैव आपतन्तीस्सर्वाश्चापदः तरामि, इत्यकथयत्. जम्बुकस्स्मित्वा, त्वया एतावदेव खलु ज्ञायते, अहं यावतः उपायान् जानामि त्वं तावतः उपायान् न जानासि, इत्यपहसति स्म. एवंस्थिते कुतश्चिन्मार्गाद्विश्वकद्रवस्तत्र समाजग्मुः. तान् शुनकान्दृष्ट्वा मार्जारः झडिति तत्रस्थं कञ्चित् तरुमारुरोह. जम्बुकः वृक्षमारोढुमशक्नुवन् उपायान्तराभिज्ञोपि तैश्शुनकैः परितस्समाक्रान्तस्सन् अमृत. तस्माद्बहुविद्यावानपि कालोचितविद्यामजानन् एवं कष्टभाजनं भवति.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## १९. बालतस्करयोः कथा.

* यस्तु स्याद्वञ्चनाशीलस्स परैर्वञ्च्यते ध्रुवम् ।
चोरः स्वयं वञ्चकोपि बालेनैकेन वञ्चितः ॥

कोपि बालः कूपोपकण्ठे उपविश्य भृशं रुदन्नभूत्. तदा कश्चिच्चोरस्तं प्रदेशमागत्य तं बालमालोक्य अये त्वं किमर्थं रोदिषीत्यपृच्छत्. स बालः अहमत्रैव क्रीडन्नासं, मय्यानम्य एतत्कूपजलमालोकयति सति मत्कण्ठस्था मुक्तास्रक् स्खलित्वा वारिणि अपतत्, अहं तं हारं नाशयित्वा गृहं गमिष्यामि यदि मत्पितरौ मा ताडयिष्यतः, तस्माद्रोदिमि, इत्यकथयत्. चोरस्तं हारमपहरेयमित्यालोच्य त्वं "मा भैषीः, अहमेतत्कूपे अवतीर्य त्वदीयां मुक्तास्रजमानीय दास्यामि, मम वस्त्राणि सम्यक्पालयन्नास्व" इत्युक्त्वा स्वपटान्सर्वानुपरि निधाय नग्नस्सन्नेव कूपे ममज्ज. तदवमज्जनानन्तरं स बालः तदीयानि चेलानि अपहृत्याधावत् ततश्चोरस्तस्मिन् कूपे चिरं हारं विचित्याप्यलभमान एव उपर्यागत्यापश्यत्. स बालो न दृश्यते स्म. तदा स तस्करः अहमेव वञ्चक इत्यज्ञासिषं, मामप्येष बालोऽवञ्चयतेति विस्मयमानस्सन् जगाम. तस्माद्वञ्चनाशीलाः कदाचित्स्वयमपि वञ्च्यन्त इव.



## २०. व्याघ्रकाककथा.

सन्तस्तृणोत्सारणमुत्तमाङ्गात्सुवर्णकोट्यर्पणमामनन्ति
प्राणव्ययेनापि कृतोपकाराः खलाःपरे वैरमिवोद्वहन्ति ॥

कस्मिंश्चिद्विपिने व्याघ्रस्सर्वानपि मृगान्गृहीत्वा भक्षयन्नवर्तत. कस्मिंश्चित् दिने वनमहिषं गृहीत्वा अभक्षयत्. तस्यास्थीनि दन्तविवरेषु लग्नीभूय वदनं सव्रणीकृत्य तं नितरां बाधन्तेस्म. तदा स पुण्डरीको बाधया कस्यचित् भूरुहस्याधःप्रदेशे वदनं विवृत्य इदं कीकसं कथं बहिर्निष्क्रामेत् अहं कथं जीवेयं किं कुर्यामिति विमृशन् वृक्षोपरि कञ्चन वायसं वीक्ष्य हे काक, एवमहमायस्यामि, मद्वदनगतं शल्यमुद्धृत्य मामुज्जीवयसि चेन्नित्यं मया आनीयमानेषु मांसेषु तव यथेच्छं दास्यामि, एतावानुपकारः कर्तव्यः इति प्रार्थयामास. तदा स वायसः सदयस्सन् व्याघ्रस्य वदनं प्रविश्य तच्छल्यमुद्धृत्य तं पुण्डरीकमालोक्य हे व्याघ्र, मह्यमामिषं ददामीत्यवदः किल, देहीत्ययाचत. स व्याघ्रस्तं दृष्ट्वा वदनप्रवेशकाले त्वामभक्षयित्वा प्राणैस्सहात्यजं खलु, तावता असन्तुष्य मांसमपि याचसि किम्, [illegible] झडिति धावेत्यब्रवीत्. त-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

स्मात् दुर्जनेषु कृतस्योपकारस्य तैरपकाराकरणमेव महान् प्रत्युपकार इति सन्तोष्टव्यम्.

---

## २१. हौणप्रभुतत्सेवकयोः कथा.

* यस्मिन् देशे यदा काले या लिपिर्यच्च भाषणम् ।
तयोस्तत्तदभिज्ञो सोधिकारे प्रशस्यते ॥

चन्नपत्तने कश्चिद्धौणप्रभुरासीत्. तस्य हौणभाषां विना इतरभाषासु स्वल्पोपि परिचयः नाभवत्. तस्माद्बहुभाषावेदिनमेकं पुरुषं स्वगृहकृत्यविचारणाय सः न्ययोजयत्. कदाचित् दण्डनटाः तत्प्रभुसमीपमागत्य नटनदण्डं निखाय स्वविद्याशक्तिं सर्वामपि दर्शयामासुः. ततस्स प्रभुः नितरां सन्तुष्य तमाधिकारिणमाहूय एभ्यः दश निष्कान् देहीत्याज्ञापयामास. स तान् स्वगृहं नीत्वा एकं निष्कं दत्त्वा गच्छतेत्यब्रवीत्. वयमतितरामायस्याखेलाम इयदेव दत्तमिति ते खिद्यमानास्सन्तः अयमधिकारी अस्मानवञ्चयतेत्यालोच्य तं प्रभुमासाद्य एतावदेव दत्तमिति दीनारमदर्शन्. प्रभुस्तद्भाषानभिज्ञतया तमेवाधिकारिणमाहूय किमेते कथयन्तीत्यप्राक्षीत्. स तं प्रभुमालोक्य स्वामिन्नेते भवत्तेषु निके-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



षु इदमेकमसमीचीनम्. एतत् गृहीत्वा अपरं दापयतेति विज्ञापयन्तीत्यकथयत्. तच्छ्रुत्वा प्रभुः कुपितस्सन् तान् ताडयित्वा प्रेषयामास. तस्मान्निवासदेशभाषानभिज्ञाश्चेत् प्रभवः एवमितरवचनं विश्वस्य अन्यायभाजनानि भवेयुः.

---

## २२. शूद्रस्य तद्वानरराजयोश्च कथा.

* सर्वं कर्म विमृश्यैव करणीयं मनीषिणा ।
नो चेत्तज्जनयेद्धानिं स्वस्यान्यस्य द्वयोश्च वा ॥

कस्याञ्चित्पल्यां कश्चित् शूद्रः कश्चिच्छागं वानरं च पोषयन्नवर्तत. तस्य कदाचित्कार्यवशात् ग्रामान्तरं प्रति प्रयाणमजनि. तदा सः दध्यन्नपाथेयं गृहीत्वा तमजं वानरं च सहादाय प्रतस्थे. मार्गे कस्यचित्सरस्तीरतरोरधस्तात् तावाबध्य दन्तानाशोध्य गण्डूषयित्वा मुखं प्रक्षालयति स्म. तावत्स कपिस्समीपस्थं दध्यन्नमशेषं भक्षयित्वा करलग्नैर्दधिकणैः छागमुखमालिप्य दूरमवातिष्ठत. ततस्स वृषलस्समागत्य छागमुखमालोक्य अयमेव अस्मदन्नमखिलमभक्षयदिति कोपेन तं ताडयामास. तस्मादविमृश्यकारिणः स्वयमेवमन्याय्यमाचरन्ति.

---

### २३. तुरुष्कप्राड्विवाकयोः कथा.

* उन्नतं पदमेत्यापि दूरदर्शी न यो भवेत् ।
स सर्वैरपहस्येत गिरिकूटगतान्धवत् ॥

पुरा मात्स्यपुरे कश्चित्तुरुष्कोऽवसत. केचिच्चोराः कदाचिद्रात्रौ तद्गृहं प्रविश्य सर्वस्वमप्यपजहुः. ततस्स तस्करान् तत्र तत्र मृगयमाणः कस्यचिद्गृहे स्वीयं लोप्त्रं किञ्चिदालोक्य तेन कारणान्तरैरपि तद्गृहपतिरेव पाटच्चर इति निश्चिकाय. ततस्तं मलिम्लुचं न्यायाधिपतिनिकटमनयत्. स प्राड्विवाकः तुरुष्कमालोक्य अये अयमेव चोर इति वदसि किल, अत्र-विषये साक्षी क इति पप्रच्छ. तदाकर्ण्य स तुरुष्कः साक्षाद्द्रष्टा कोपि नास्तीत्यवदत्. तच्छ्रुत्वा स प्राड्विवाकः असाक्षिको विवादो न ग्राह्य इति धर्मशास्त्रे श्रूयते, तस्मात्त्वद्व्यवहारं न विचारयामीत्यवदत्. स यवनस्तु तदाकर्ण्य स्वपादरक्षामादाय तं चोरमताडयत्. न्यायाधिपतिस्तद्दृष्ट्वा किमेनमुपानहा ताडयसीति पप्रच्छ. तुरुष्कस्तु अयं चौर्यायागमनात्पूर्वं अहमस्मिन्काले आगमिष्यामीति असूचयिष्यद्यदि तदा मम साक्षिणस्सुलभा एव अभविष्यन्. अयं मेऽसूचयन्,



तथा कुतो नासुसूच इति सन्ताडयामीत्यवदत्. न्यायाधिपतिस्तच्छ्रुत्वा लज्जितस्तूष्णीमास. तस्मादधिकारिणः अविमृश्यकारिणश्चेत् एवमपमानपात्राणि भवेयुः.

### २४. शूद्रीनकुलयोः कथा.

* योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तावत्तप्यते मूढो यावद्देहनिपातनम् ॥

पल्माटिदेशे कश्चिच्छूद्रः कञ्चिन्नकुलं पोषयन्नविद्यत. स कदाचिद्ग्रामान्तरप्रयाणेसति तं बभ्रुमात्मभार्यावशे समर्प्य गृहान्निर्ययौ. अपरेद्युस्सा नारी स्वापत्यं दोलायां शाययित्वा तं नकुलं तन्निकटे निक्षिप्य जलाहरणार्थं तटाकं जगाम. तावत्कश्चित्सर्पस्तद्दोलासमीपमाययौ. तदा नकुलस्तमुरगं खण्डशश्छित्त्वा रक्तसिक्ताङ्गस्तामभिययौ. सा तं दृष्ट्वा अयं मच्छिशुमच्छिनदिति रुषा दण्डमादाय तं ताडयित्वा गतप्राणमकरोत्. ततस्स्वभवनमासाद्य दोलायां सुखशायिनं बालकं तमधोधः खंडशो निकृत्तमहिंचावलोकयामास. तदनु हा महानिन्द्यहं शिशुरक्षणमुरगशत्रुं समहरमिति

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

बहुधा शुशोच. तस्मात् क्रोधादविमृश्यकारिणां एवं-विधानि व्यसनानि सम्भवन्ति.

### २५. राज्ञस्तद्दुष्पुत्रस्य च कथा.

* साम्ना सर्वेप्यधीनास्स्युस्तद्विना बोधितं वचः ।
न सम्यग्गृह्यते लोकैर्निर्व्यञ्जनमिवाशनम् ॥

उज्जयिनीपत्तने सुदर्शनो नाम राजा आसीत्. तस्यैकः कुमारोऽवर्तत. स तावत् दुष्टान्सर्वानपि शपन् सन् विदुषः परिहसन् दरिद्रानपि बाधमानः बहुधा कुमार्गचारी बभूव. एवं जनकण्टकं कुमारं दृष्ट्वा राजा नितरां चिन्तया तान्तः तमुपह्वरे एवमवादीत्. अये वत्स, त्वमेवं पण्डितादीन् सर्वानपि मा शप, भवदीयदौष्ट्येन ममाप्यपयशः सम्भविष्यति, त्वत्कृतदूषणेन तेषां न किमपि हीयते, पश्य यो वा को वा दिविष्ठं भास्करं पश्यन् असूयया गण्डूषजलैः थूत्करोति चेत् आदित्यस्य न कापि हानिः, किन्तु स्वमुखमेव गण्डूषजलशीकरैर्दूषितं भवेत्, इति पितुरुपदेशमालोच्य सः स्वीयं दौष्ट्यमत्यजत्. ततस्सुखमवर्तत. तस्माच्चतुरैर्मूर्खाः एवं सामोपायेन समीकरणीयाः.



### २६. ब्राह्मणव्याघ्रयोः कथा.

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुश्शीततां याति वह्निः ॥
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥

धारापुरे कश्चिद्ब्राह्मणोऽवर्तत. स कदाचित्पुष्पफलमपचेतुं अरण्यमाससाद. तत्रैकश्शार्दूलस्तं दृष्ट्वा अनुधाव्य जग्राह. तदा अतिभीतस्सविप्रस्तं नमस्कृत्य, अये पुण्डरीकेश्वर कृपया मां दिनत्रयपर्यन्तं मुञ्च मत्पत्नीपुत्रादीनालोक्य पुनरागत्य तव ग्रासीभविष्यामि, इति सानुनयं सशपथं च प्रार्थयामास. तदा स पुण्डरीकोपि तथैवानुमेने. ततस्स द्विजः स्वगृहमासाद्य स्वकृत्यमखिलं निर्वर्त्य सत्यसन्धतया व्याघ्रसमीपमाजगाम. द्वीपी तु तं दृष्ट्वा नितरां सन्तुष्य त्वादृशं सत्यप्रतिज्ञं कुत्रापि नापश्यमिति प्रशस्य सुखमास्वेत्युक्त्वा गृहं प्रति प्राहिणोत्. तस्मात्सत्यवादिनं शत्रवोपि बहुमन्यन्ते.

### २७. शुकवानरकथा.

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
वानरानुपदिश्याथ स्थानभ्रष्टा ययुः खगाः ॥

मोक्षवतीतीरे महानवटवृक्षो विद्यतेस्म. तत्र बहु-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

वश्शुकाः नीडानि निर्माय निवसन्तिस्म. एवं स्थिते कदाचिन्महती वृष्टिरासीत्. तया बाधिताः केचित्प्लवगाः तत्तरुमूलमशिश्रयन्. तानुद्वीक्ष्य ते कीराः कृपया भो प्लवङ्गाः भवतां करपादनखदन्तादयस्सर्वेप्यवयवाः वर्तन्ते, तथाप्येकं वा कुलायमकृत्वा खिद्यध्वे, इतःपरं वा निवासान्सम्पादयतेत्यवोचन्. तच्छ्रुत्वा ते शाखामृगाः अस्मानेते उपहसन्तीति कुपितास्सन्तः वृष्ट्यां विरतायां तद्भूरुहमारुह्य तेषां कुलायान् तच्छिशूनप्युच्छिद्य अधः पातयामासुः. तस्मान्मूर्खाणां हितोपदेशोपि उपदेष्टुरपकारायैव भवति.

---

## २८. तेन्नालरामकृष्णकृतचोरवञ्चनकथा.

* स्वाहिताय प्रवृत्तानां प्रयत्नानखिलानपि ।
विफलीकृत्य तैरेव स्वकार्यं साधयेत्कृती ॥

तेन्नालरामकृष्णो नाम कश्चित्कविरविद्यत. कदाचित्केचिच्चोराः तद्गृहमागत्य रात्रौ क्वचिन्निलीय वर्तन्तेस्म. तदवबुध्य स रामकृष्णस्सर्वस्वमपि निगूढे निक्षिप्य पत्नीं प्रति अयि शृणु, अस्मिन् पुरे बहुधा चोरोपद्रवाश्श्रूयन्ते, तस्मात्सर्वस्वमपि अस्मन्निष्कुट



वापिकायां निक्षिपाव, इतिवचनं चोरान् श्रावयितुम् उच्चैराहस्म. तदनन्तरमेकां पेटिकां शिलाभिस्सम्पूर्य रज्जुभिः दृढं बध्वा तां मञ्जूषां स्वनिष्कुटवापिकायां सधढात्कारं पातयामास. तच्छब्दमाकर्ण्य ते तस्कराः वापीनिक्षिप्तं तद्धनमपहर्तव्यमित्यालोच्य वापिकायां स्वेषु कञ्चिदवतारयामासुः. तेन पेटिकामुद्धर्तुमशक्तेनाभावि. ततस्ते तत्रस्थघटीयन्त्राभ्यां जलान्युद्धर्तुमयतन्त. तावत्स कविरुपांशु स्थित्वा निष्कुटपादपानां तज्जलमुपयोक्तुमारभत. तदनु कतिपयघटिकानन्तरं अये आलवालानि सर्वाण्यपि पूर्णान्यासन्. प्रातःकालोप्यजायत. जलैरलमलमित्युच्चैर्ननाद.तदाकर्ण्य चोराः प्रभीतास्सन्तो गृहात् मुच्यामहे यदि स एव नः परमो लाभ इति मत्वा द्रुतपदमदुद्रुवन्. तस्मादेवं निपुणाः जनाः अहितप्रयत्नैरपि हितमेव सम्पादयन्ति.

---

## २९. महम्मत्सुल्तानस्तन्मन्त्रिणश्च कथा.

स किंसखा साधु न शास्ति योधिपं
हितान्नयस्संशृणुते स किंप्रभुः ॥
सदाऽनुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ॥

[illegible] महम्मत्सुल्तान्नामकः कश्चिन्महीपतिरा-

Digitized by Ajit Gargeshwari For Karnataka Samskrita University

सिष्ट. सः स्वदेश्यानन्यदेशीयांश्च बहुधा बाधमानो बभूव. तस्मात्तद्देशस्तत्रतत्र नष्टप्रायोऽजनि. एवं स्थिते तदमात्यस्तु येन केनापि प्रकारेण राजा मया सन्मार्ग एव प्रवेशयितव्यः, इत्यालोच्य कस्यचिद्द्वेषेस्सेवनात् पक्षिभाषा मया ज्ञायत इति तदा तदा निवेदयन्नासीत्. कदाचिदवनीपतिर्मन्त्रिणा सह मृगया निर्वर्त्य कस्यचित्काननतरोरधस्तादुपाविशत्. तदा तन्महीरुहस्योपरि द्वौ घूकावुपविश्य घूत्कुर्वन्तावास्तां. राजा तच्छ्रुत्वा मन्त्रिन् त्वं पक्षिभाषां जानासि किल, एतौ किं किं सल्लपतः वदेत्यवदत्. सचिवस्त्वयमेव राजानं बोधयितुं समयइति निश्चित्य विज्ञापयामास. स्वामिन्नयं विज्ञापनानर्हस्सल्लापः, तथापि निर्बन्धाद्विज्ञापयामि, एतयोः कौशिकयोरेकः पुत्रवान्, अन्यः दुहितृमान्, अमू स्वपुत्रयोः परस्परं विवाहं कर्तुं प्रयतेते, प्रथमस्तावत् भाव, त्वं कन्यादानकाले मत्पुत्राय पञ्चाशच्छून्यग्रामान् वरदक्षिणां दास्यसि किमिति वदति, द्वितीयस्तु, अस्मन्महम्मत्सुल्तान्प्रभौ प्रभवितरि सति का वा न्यूनता परश्शतान्वा निर्जनग्रामान् दास्यामीति



कथयतीति. तच्छ्रुत्वा भूपतिर्नितरां लज्जितः खिन्नश्च भूत्वा सर्वान्ग्रामान् सम्यगभिवर्ध्य सुखेन प्रजाः परिपालयन् कीर्तिभाजनमासीत्. तस्मात्कुशला अमात्याः दुष्प्रभून् एवं समयोचितं बोधयित्वा प्रजाक्षेमं कुर्वन्ति.

### ३० सिंहस्य अन्यमृगाणां च कथा.

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलं ।
पश्य सिंहो मदोन्मत्तः जम्बुकेन निपातितः ॥

दण्डकारण्ये कश्चिन्मृगपतिः सर्वान्मृगानदन्नुवास. कदाचित्सर्वे मृगास्सङ्घीभूय कण्ठीरवोपकण्ठमेत्य एवं विज्ञापयामासुः, देव प्रतिदिनमेकैकं मृगं तवोपहारीकुर्मः, इतस्त्वमस्मानेकवारमेव मा संहर, इति. तद्वचनमाकर्ण्य सिंहस्तथेत्यनुमेने. तदा सर्वे मृगाः दिने दिने एकैकं पशुं प्रेषयन्तः शिष्टास्स्वपर्यायपर्यन्तं निर्भयमवसन्. एवं स्थिते कदाचिज्जम्बुकस्य पर्यायस्समजनि. स तावत् येन सिंहस्संह्रियेत, येन चाहमस्मान्मरणान्मुच्येय, तमुपायं करोमीत्यालोच्य शनैश्शनैः सिंहमभिययौ. तावत्स पञ्चास्योपि किमेवं कालं व्यलंबयः इति दन्तान् कटकटयन् तमभिदुद्राव. जम्बुकस्तुतरां भीत्वा

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

वेपमानः सविनयमाचष्ट. प्रभविष्णो, भवत्कृते मृगैः प्रेषितं जम्बुकमानयन्नहं मध्येमार्गं केनचिद्भवत्सजातीयेन आग्राहिषि, मया विज्ञापितेपि भवद्वृत्तान्ते सोतीव कुपितस्तं जम्बुकं निहत्य मां प्रत्याहस्म. भवन्तं भवत्स्वामिनं केसरिणं च अद्यैव निहन्मि, गच्छ, मद्वृत्तान्तं तस्मै हर्यक्षाय कथयेति मां भवत्सकाशं प्राहिणोच्च. इतःपरं देव एव प्रमाणमिति. तच्छ्रुत्वा सिंहः प्रलयान्तक इव क्रुद्धस्सन् तं मत्प्रतिपक्षं झडिति दर्शयेति जगर्ज. ततस्स क्रोष्टा तं कूपसविधमुपनीय सोत्रास्ते इत्यदर्शयत्. केसरी तु जले स्वप्रतिबिम्बमालोक्य प्रतिसिंहधिया तदुपरि निपत्य तत्रैव ममार. तस्मात्प्रबलश्शत्रुरुपायेनैव जेतव्यः.

### ३१ ब्राह्मणब्राह्मणपुत्रयोः कथा.

* कृशोपि बहुमान्येत वर्धिष्णुस्सकलैर्जनैः ।
सादरं के न पश्यन्ति कृशामपि विधोः कलाम् ॥

वेदवेदाङ्गादिसकलविद्यानिपुणः कश्चिद्विप्रः शिष्यैस्सह काशीं प्रति गच्छन् सन् वनमार्गमध्ये सन्ध्याकाले सति तत्र गां [illegible]



श्यत्. तं दृष्ट्वा भोः, कियद्दूरे ग्राम इत्यपृच्छत्. स चैत्रमुवाच. द्विजवर, पश्य मां बालं, ईक्षस्व चेमां परिणतां वेलां, आलोकय चैनां मया पाल्यमानां कठोरगर्भां गाञ्च, ततस्त्वत्पृच्छायास्त्वमेवोत्तरं ज्ञास्यसीति. एवं श्रुत्वा स विप्रः आं समीपएव ग्रामोस्ति, अन्यथा अस्मिन् काले एष कथमेवं कुर्यादिति मत्वा तेन सह तत्पल्लीं प्राविक्षत्. तत्पितुरन्तिके तं शतशः श्लाघमानः पितुरनुमत्या तं छात्रमकरोत्. ततस्तेन सह काशीं गत्वा तस्मै सकलाः कला उपदिदेश. स महापण्डितो भूत्वा सुखमवर्तत. तस्माद्बालाः प्रतिभाशालिनश्श्वेत्सर्वैरप्येवं सम्मान्यमानास्सुख्यन्ति.

### ३२ राज्ञस्तदाश्रितयोर्ब्राह्मणतुरुष्कयोश्च कथा.

सुखस्य दुःखस्य न कोपि दाता ।
परो ददातीति कुबुद्धिरेषा ॥
अहं करोमीति वृथाभिमानः ।
स्वकर्मजालग्रथितो हि लोकः ॥

कस्यचिद्राज्ञस्समीपे द्वावाश्रितावासातां. तयोरेको [illegible] प्रभुस्तयोरीप्सितानि

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

प्रतिदिनं ददत्सन् दयया रक्षन्नभूत्. स कदाचित्ताबुभावाहूय युवां कस्य बलेन जीवथः, इत्यपृच्छत्. तदा विप्रः प्राह, प्रभो, अहं तव कृपाबलेन जीवामीति. तुरुष्कस्तु दैवबलेनाहं जीवामीत्यवादीत्. जनपतिस्तत्तत्त्वजिज्ञासया कस्मिंश्चित्कूष्माण्डे बिलं कृत्वा तत् मुक्ताफलैरापूर्य तद्रन्ध्रमाच्छाद्य ब्राह्मणायादात्. तुरुष्काय पादरूप्यं ददौ. तौ द्वावपि ते आदाय प्रतस्थाते. ब्राह्मणस्तदा स्वीयं फलमसमीचीनं मन्वानस्तुरुष्कं प्रत्येवमाहस्म, अयि मद्गृहे तैस्तैर्दत्तानि कूष्माण्डफलान्यनेकानि सन्ति, तस्मादिदं यस्मै कस्मै वा विक्रेतुमिच्छामि, त्वयाऽभिलष्यतेचेदेतद्गृहीत्वा तत्पादरूप्यमितो देहीति. तद्वचनमाकर्ण्य स तुरुष्कः तस्य स्वोपयुक्ततया तथैवानुमेने. ततस्तौ ते फलपादरूप्ये विन्यमिनुतां. तदनु तुरुष्कः स्वगेहमासाद्य तत्फलं भित्त्वा तत्र मुक्तास्समालोक्य विस्मयमानस्सन् दैवदत्तमिति सन्तुष्य राज्ञे सकलमप्येनं वृत्तान्तं विज्ञापयामास. राजापि विस्मित्य दैवायत्तं जगत्सर्वं तद्यतनं विना तृणमपि न चलतीत्यालोच्य मया सर्वो जीवतीति



धियमत्याक्षीत्. तस्मात्केनापि अहं कर्ता अहं कारयिता इत्यहङ्कारो न कर्तव्यः.

### ३३ दरिद्रब्राह्मणकथा.

चिन्तामनागतार्थस्य कृत्वा यस्तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥

कश्चिद्दरिद्रब्राह्मणोऽवर्तिष्ट. स कदाचिन्मकरसङ्क्रान्तौ कुत्रचित्तैलघटदानं प्रतिगृह्य स्वग्रामं प्रति निवर्तमानस्सन् प्रच्छायशीतले कस्मिंश्चित्सैकतप्रदेशे श्रममपनुदन् एवमालोचयामास. अहं तावदेतावत्तैलं समुपार्जयं, एतद्विक्रीतं चेद्रूप्यतयं लभ्यते, तेन च अजामेकां क्रीत्वा तच्छिशूंस्तच्छिशूंस्तच्छिशूंश्च संयोज्य सङ्घीकरिष्यामि, ततस्तं समुदायं च विक्रीय लब्धैर्धनैर्महिषीर्गाश्च क्रेष्यामि, तत (A) स्तर्णका (B) श्शकृत्करयः एकहायिन्यो द्विहायिन्यः (C) प्रष्ठौह्यः (D) परेष्टुकाश्च सम्पत्स्यन्ते, तद्द्वारा बहुधनं सम्पाद्य सचित्रमुन्न-

(A) सद्योजातस्तु तर्णकः. (B) शकृत्करिस्तु वत्सतरः. (C) प्रष्ठौही बालगर्भिणी. (D) बहुसूतिः परेष्टुका.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

तमनर्घं च सौधं विरचयिष्यामि, ततः कामपि कमलाक्षीमिन्दुमुखीं कुन्दरदनां कम्बुकण्ठीं कोमलाङ्गीं परिणेष्यामि, तया सह परिणतशरच्चन्द्रचन्द्रिकायां क्षपायां आमुक्तमुक्तावितानवति मणिमयमञ्चतले शयानस्सफलीकरिष्यामीदं जन्म, सा नारी मदाज्ञामतिक्रमिष्यति चेत्तदा तां एवं पादेन ताडयिष्यामि, इत्यालोचनानुसारेण स्वपादसमीपस्थं तैलभाण्डं पादेनातीतडत्. भाण्डं भग्नमभूत्. तैलं सर्वं नष्टमभूत्. तस्मादित्थं वृथा मनोरथाः केनापि न कर्तव्याः.

### ३४ रुग्णबधिरयोः कथा.

* परोक्तमगृहीत्वैव यस्स्वयं प्रतिभाषते ।
सोपमानं भजत्येव बधिरस्स्वसखादिव ॥

कस्मिंश्चित्पुरे कश्चिद्बधिरः वसति स्म. स कदाचिद्रुग्णं स्वसखमालोकितुं प्रतस्थे. स पथि गच्छन्नेवमालोचयामास. मत्सुहृदमेत्य प्रथमतो मया तव ज्वरः किञ्चिच्छान्तो वेति प्रष्टव्यं, शान्तप्राय इति स वक्ष्यति, ततः किमौषधं निषेवसे इत्यनुयोक्तव्यं, एतादृशौषधं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



सेवे इति स भाषिष्यते, तदनन्तरं वैद्यः क इति प्रष्टव्यं, भिषगेतादृश इति भणिष्यति, तत्रतत्र तत्तदनुरूपमुक्त्वा तमनुज्ञाप्यागन्तव्यमिति.

अथो स्वमित्रमासाद्य स्वालोचनानुरूपं प्रष्टुमुपचक्रमे. बधिरः सखे, तव ज्वरः किंचिच्छान्तो वा ? रुग्णः–(सवेदनं) एवमेव संतप्ये, बधिरः भगवांस्तवैवमेव करोतु, किमौषधं निषेवसे ? रुग्णः (सकोपं) ममौषधं मृत्स्ना किमनेन विचारणेन, बधिरः (सादरं) तदेव तवोचितं, कस्ते चिकित्सकः ? रुग्णः (सकोपोद्रेकं) ममागदङ्कारस्स यमः, अवगच्छ, उत्तिष्ठ, बहिर्गच्छ. बधिरः, त्वद्विषये स एव समर्थः, तमेवाश्रय. रुग्णः ( सकोपनिश्वासव्यथोद्रेकमुच्चैः ) कुतस्त्यमिदं कुत्सितं प्रारब्धं ज्वलत्पावके लवणं निक्षिप्योपहसतीव, इत्युक्त्वा बधिरं बहिर्निस्सारयामास. एवमपमानितस्स बधिरो यथागतं जगाम. तस्मात्परोक्तं सम्यगगृहीत्वा केनापि न प्रतिवक्तव्यम्.

## ३५ परोत्कर्षासहिष्णुब्राह्मणकथा.

ते वै सत्पुरुषाः परार्थघटकास्स्वार्थान्परित्यज्य ये
सामान्याश्च परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

कश्चित्परोत्कर्षासहिष्णुर्ब्राह्मणः विद्यतेस्म. सः स्वदारिद्र्यनुनुत्सया महैश्वर्यमभिलषन् कस्यचित्सरसस्तीरे तपश्चचार. तद्दृष्ट्वा तादृशस्तत्प्रातिवेशिकः स्वयमपि तत्रैव तपस्तप्यते स्म. किञ्चित्कालानन्तरं भगवान्सन्निधाय आद्यं प्रति तवाभीप्सितं किमिति प्राह स्म. तदा सः परमेश्वरं प्रति एवं प्रार्थयामास. भगवन्, मत्प्रातिवेशिकः यद्वरिष्यति तद्द्विगुणितं मे देहीति. तदाकर्ण्य भगवान् द्वितीयमेत्यानुयुङ्क्तेस्म. तपस्विन्, त्वया यद्वरिष्यते तद्द्विगुणितं त्वत्पारवेशिकः प्रार्थयामास, किं तवाभीप्सितमिति. द्वितीयस्तदाकर्ण्य परोत्कर्षासहिष्णुतया स्वहानिमप्यनालोच्य स्वामिन्, मया एकेनाक्ष्णा काणेन भवितव्यमिति वरयामास. स देवस्तथैव भवत्विति व्याहृत्यान्तरधात्. तदा द्वितीयस्यैकं नेत्रमहीयत. प्रथमस्य द्वे अपि. तस्मादेवं असूयापराः परहानिचिकीर्षया स्वहानिमपि न गणयन्ति. * * *



## ३६ विधवाप्राड्विवाककथा.

* न मातृसदृशो बन्धुर्नमातृसदृशस्सखा ।
कुपुत्रो भुवि जायेत न कुमाता भवेत्कचित् ॥

दक्षिणदेशे कश्चिद्विप्रोऽवर्तत. तस्य द्वे भार्ये अवर्तेतां. तयोराद्या एकं सुतमसूत. सः बालस्य सप्तमे मास्येव तमादाय पत्नीभ्यां सह काशीं प्रस्थाय मध्येमार्गमम्रियत. ते नार्यौ बालेन साकमेकमग्रहारं प्रविश्य तत्र बालं समानप्रीत्या पोषयन्त्यौ सत्यौ सद्वृत्त्या जीवन्त्यावासातां. ततः कदाचित्तयोः दैववशात्परस्परं कलहस्समभूत्. तदा कनीयसी शिशुर्मत्प्रसूतइति तमादाय गन्तुमुपचक्रमे. ज्यायसी तु मत्पुत्रं मा स्पृशेति तां रुरोध. ततस्तयोः कलहः न्यायाधिपतिसमीपमाप. सः न्यायाधिपतिर्विचार्य तं शिशुं द्वेधा विदीर्य द्वाभ्यां देहीति स्वभृत्यमवादीत्. तदा आद्या ब्राह्मणी प्राड्विवाकं प्रति विज्ञापयति स्म, स्वामिन्नेष बालस्तदीय एव, मा विदारय, तस्या एव दापयेति. तच्छ्रुत्वा सोऽधिकारी अहो इयमेवैतज्जननी, तत एव सकरुणमालपतीति निश्चित्य तं तस्यै अदापयत. तदा सर्वे



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

च तमधिकारिणं शश्लाघिरे. तस्मादेवं जनन्यस्स्वापत्यानां क्षेममेव चिन्तयान्ति.

---

### ३७ वणिजस्तद्दुस्सेवकस्य च कथा.

अवश्यं लभते मर्त्यः फलं पापस्य कर्मणः ।
घोरं प्रत्यागते काले कर्ता नास्त्यत्र संशयः ॥

इन्द्रप्रस्थपुरे बहुधनवान्कश्चिद्वणिगवात्सीत्. तन्निकटे कश्चित्कर्मकारः कृतवेतनस्तत्कर्म कुर्वन्वसति स्म. स कदाचिच्छ्रेष्ठिनः किञ्चिद्द्रव्यमपहृत्य पलायांबभूव. श्रेष्ठीतु वाणिज्यवशादन्यत्पत्तनमासाद्य तत्रैनं चोरमालोक्याग्रहीत्. सोपि त्वमेव मद्भृत्यः मद्धनापहारी च, दैववशान्मत्सम्मुखे पतितोसि, प्रत्यर्पय मद्धनमिति वणिजमेव निर्बबन्ध. स वणिगतीव खिन्नो भूत्वा न्यायाधिपतये विनिवेदयति स्म. सोक्षदर्शकः किञ्चिदालोच्य तयोस्तत्त्वमवजिगमिषुस्सन् तौ गवाक्षाद्बहिः निक्षिप्तशिरस्कावाधाय स्वभृत्यमवादीत्. अये, एतयो र्विवादमूलमिदानीं निर्णीतं, गवाक्षे दृश्यमानं भृत्यस्य शिरः छिन्धि, वणिजं विमुञ्चेति. तदाकर्ण्य स भृत्यः छेदनभिया स्वशिरः प्रत्याचकर्ष. वणिक् तथैव तस्थौ.



तदालोक्य प्राड्विवाकः समाकृष्टशीर्षं चोरं मत्वा वणिजे धनं दापयित्वा तमदण्डयत. तस्माद्दुष्कृत्यकारिणां यदाकदावा एवं हानिरेव सम्भवेत.

---

### ३८ राजरजकयोः कथा

महतामास्पदे नीचः कदापि च न युज्यते ।
न हि चूडामणिस्थाने पादुका स्थातुमर्हति ॥

कलिङ्गदेशे कश्चिन्महाराजः विद्यते स्म. तत्सन्निधौ कश्चिद्रजकः प्रतिदिनं सम्यग्वस्त्राणि क्षालयन्नुपजीवन्नासीत्. कदाचिद्राजा तस्मै प्रसन्नस्सन् किं तवाभीप्सितं कथयेति बभाण. तदा नितरां प्रहृष्य स रजकः स्वामिन्यदि मय्यनुग्रहः. तर्हि भवदास्थाने अमात्याधिकारं देहीत्ययाचत. तथैवाङ्गीकृत्य राजा स्वमन्त्रिणं दूरीकृत्य तत्स्थाने रजकं आरोपयामास. ततः कतिपयमासान्तरएव शत्रवोऽसमर्थं मन्त्रिणं श्रुत्वा राज्यमाहर्तुमाजग्मुः. तद्विज्ञाय राजा मन्त्रिणमाहूय शत्रवस्समापतिष्यन्ति, सन्नद्धोभवेत्याज्ञापयामास. मन्त्री तु प्रभो, सर्वतस्सज्जोस्मीत्युक्त्वा उदासीन एवावतस्थे. ततश्शत्रवस्समागत्य पुरं परिवव्रुः. तदा राजा इति

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कर्तव्यतामूढस्सन् किं करणीयं ? कावा गतिरिति मन्त्रिणमाहस्म. स रजकः स्वामिन्कुतो बिभेषि, अस्मत्कष्टं दैवमेव निवारयति, एतद्राज्यभारखेदं ते शत्रव एवानुभवन्तु, तवाभ्युदयकाले मामादृतवानसि, अहमपि तथैव स्यां, शृणु, तैश्शत्रुभिरप्यपहर्तुमशक्या मम पटक्षालनजीविका सिद्धैव वर्तते, तत्र तवाप्यर्धं दास्यामि, सुखेन तिष्ठाव, एवमालोच्यैव सज्जोस्मीत्यवदमीत्याह स्म. तदाकर्ण्य राजा नितरां खिन्नोऽभूत्. तस्मात्प्रभुभिस्तत्तदर्हतानुरूप एवाधिकारः दातव्यः.

## ३९ काकहंसकथा.

* अल्पः प्रगल्भोप्यधिकेन सार्धं
स्पर्धां न चार्हत्यवनौ कदापि ॥
विभावसौ व्योम्नि विजृम्भमाणे
खद्योतपालिः क्वनु लीयते वा ॥

नर्मदातीरे कश्चिद्वटवृक्षो वर्तते स्म. तत्रैकः काको न्यवसत्. स कदाचिद्गगने चरन्तं हंसमालोक्य क्व प्रयासीत्यपृच्छत्. स कादम्बः मानससरोवरं प्रस्थितोस्मीत्यवदत्. काकः त्वयासहाहमप्यागमिष्यामि, मामपि



तं देशं नयेत्यर्थयते स्म. हंसः स्मित्वा क्व मानसं क्व समुद्रोपरिपथः क्व भवानिति प्रत्युत्तरयति स्म. स वायसो दुरहङ्कारदूषितस्सन् अये चक्राङ्ग, मामवरं सम्भाव्य कुतो गर्वायसे? पश्य मद्वेगमिति तस्य पुरः पुरएव चचाल. तावुभावपि किञ्चिद्दूरमगमतां. तावत् ध्वाङ्क्षः कुन्ठितशक्तिस्सन्पयोनिधौ पतनोन्मुख इवासीत्. तदालोक्य हंसः कृपया स्वपक्षयोस्तमादाय कूलं प्रापयामास. तस्मादल्पो बलवानपि महद्भिस्साकं विवदेत चेत् एवमपमानमुपगच्छति.

## ४० द्वयोः कुविन्दयोः कथा.

यद्धात्रा निजफालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेपि नितरां मेरौ च नातोधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृण्हाति तुल्यं जलम् ॥

कर्णाटेषु हैमन्तोनाम कुविन्दोऽवर्तत. सः बहुमूल्यान्पटान्वयन्नासीत्. तथाप्ययं मितादाय एवाभवत्. तत्प्रातिवेशिकः धीमान्नाम कश्चित्तन्तुवायः स्थूलस्थूलतन्तुकावस्त्राण्युत्पादयन्नपि सुखेन वसन्बहुधनवानभूत्.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

तमवलोक्याद्यः निपुणस्यापि ममास्मिन्ग्रामे न धनलाभ इत्यालोच्य देशान्तरमयासीत्. तत्र स्वनैपुण्यात् बहुधनं सम्पाद्य परावर्तमानो मार्गे क्वचित्सत्रे न्यद्रासीत्. तदा तस्करास्तद्धनमपजह्रुः. प्रातस्सुतरां व्यथितस्सः स्वग्राममेत्य यथापुरमवात्सीत्. तस्मान्महाप्रयत्नवतापि दैवनिबन्धनमतिक्रमितुं न शक्यते.

## ४१ वृद्धायाः पौराणां च कथा.

योमे गर्भगतस्यापि वृत्तिं कल्पितवान्प्रभुः ।
शेषवृत्तिविधानेपि स एव प्रभुरव्ययः ॥

महानगरनामनि पुरे काचिज्जरती न्यवसत्. तस्यास्समीपे एकः कुक्कुटः एका हसन्तिका च अविद्येताम्. तस्मिन्कुक्कुटे कूजति पौरास्समागत्य तद्धसन्तिकायाः अङ्गारं गृण्हन्त आसन्. एवं स्थिते कदाचित्सा स्थविरा मत्कुक्कुटकूजनात्प्रातस्सञ्जायते, मद्वह्निना सर्वेषां पाको भवति, एतदभावे कथं वा जीवेयुः, पश्याम इत्यालोच्य, तद्द्वयमादाय दूरमरण्यं जगाम. अपरेद्युस्तत्रागतमेकमालोक्य अयि! ह्यः मच्चरणायुधाद्यभावेपि सर्वे प्रातर्बुबुधिरे किम्? भोजनादिकमकुर्वन्वा नवा इति पप्रच्छ. स तु तदभिप्रायं ज्ञात्वा अयि वृद्धे! किमेवं पृच्छसि?



सकलरक्षके भगवति जाग्रति का त्वं वराकी, गच्छ गृहं, निर्जने वने कुतः खिद्यसे इत्युवाच. ततस्सा पुरमासाद्य यथापुरमवस्थितान् जनानालोक्य स्वाभिमानं जहौ. तस्मान्मयैते जीवन्ति, मया एवं क्रियते इत्याद्यभिमानः केनापि न कर्तव्यः.

## ४२ गृहस्थस्यातिथेश्च कथा.

सर्वत्र लोके बहुमानहेतु-
र्वासः प्रधानं खलु योग्यतायाः ।
पीताम्बरं वीक्ष्य ददौ तनूजां
चर्म्माम्बरं वीक्ष्य विषं समुद्रः ॥

पुरा कश्चिद्विद्वान् दारिद्र्यवशात्कच्चरं वसनं वसानः कस्यचिदधिकारिणस्समीपमाससाद. स तं मलिनवस्त्रधारिणमालोक्य समीपे नोपवेशयामास. अन्ततः गिरापि नोपचचार. स बुधस्तु नितरां निर्विद्य अन्यगृहं गत्वा उत्तमानि वसनान्यर्थयित्वा अपरेद्युस्तमेवाधिकारिणमाससाद. तदा स उत्तमवस्त्रधारिणं तं विपश्चितमालोक्य प्रत्युत्थाय तत्करं गृहीत्वा स्वसमीपे उपवेशयन् स्वसखानां पुरतः आगता इमे महान्तः पण्डिताः प्रसिद्धतमाः गुणशालिनः परोपकारनिरताः

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

पुण्यवशादेतादृशानद्राक्षं,इदं दिनं सुदिनमासीत्,कृतार्थोऽस्मीत्यब्रवीत्. ततस्तेन विदुषासह सानुरागं सँल्लपन् तं गृहाभ्यन्तरमुपनीय अग्रासने उपवेश्य दिव्यभोजनं कारयामास. भोजनकाले सविद्वानेकं कबलमादाय स्ववस्त्रोपरि निवेशयामास. तदानीं सोऽधिकारी किमिदमित्यपृच्छत्. स पण्डितः पूर्वमागमनकाले भवता वाचापि सत्कारं न प्राप्तं. इदानीमेतद्वसनबलादेवं सन्मानितोऽस्मि, तस्मादिदं भोजनं ममैतद्वसनमेवादात्, तस्मादहमिदमंशुकमादौ भोजयामीत्युवाच. तदाकर्ण्य सोऽधिकारी लज्जितोऽभूत्. स पण्डितस्तु अहो जनानां वस्त्रमेव भूषणं, तदभावे बृहस्पतावपि जनानामनादरो भवेदिति विज्ञाय स्वगृहं जगाम. तस्मान्मलिनवस्त्रं केनापि कदाचिदपि न धारणीयं.

## ४३ द्वयोर्वणिजोर्न्यायाधिपतेश्च कथा.

* यः परस्य विषमं विचिन्तये-
त्प्राप्नुयात्स कुमतिस्स्वयं हि तत् ।
पाण्डवेष्वनलदः पुरोचनो
दह्यते स्म जतुसद्मनि स्वयं ॥

अवन्तीपुरे सुबुद्धिदुर्बुद्धिनामानौ द्वौ वणिजावा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



सातां. तौ देशान्तरे बहुधनं सम्पाद्यागत्य कस्यचित्तिन्त्रिणीतरोः अधस्ताद्भूमौ तत् गोपयामासतुः. कदाचिद्दुर्बुद्धिर्गूढमागत्य तदखिलं जहार. अपरेद्युर्धनं गृण्हीव इति स सुबुद्धिमानीय तां भुवं चखान. तत्र धनाभावात् सुबुद्धिं गृहीत्वा त्वमेव मामवञ्चयथाः मदीयं धनमर्पय, इति तं निर्बबन्ध. तयोः कलहः न्यायाधिपतिनाप्यश्रावि. स प्राड्विवाकः दुर्बुद्धिं प्रति त्वं सुबुद्धिरेव धनमखिलमपाहरदिति वदसि किल, तत्र कस्साक्षीति पप्रच्छ. दुर्बुद्धिस्तु स तिन्त्रिणीतरुरेवेत्युत्तरयति स्म. एतत्तत्त्वजिज्ञासया न्यायाधिपतिस्तिन्त्रिणीतरुमासाद्य अनयोर्विषये किं जानासीति तमपृच्छत्. तावदेव दुर्बुद्धिः स्वपितरं तत्कोटरे उपवेश्य सुबुद्धिरेव धनमपाहार्षीदिति प्रत्युत्तरं दापयामास. ततस्सोऽधिकारी सञ्चिन्त्य तत्कोटरे किञ्चित्तृणं प्रज्वाल्य धूममुत्थापयति स्म. तदा निर्बद्धश्वासः स्थविरः बहिर्निपत्य ममार. न्यायाधिपतिः दुर्बुद्धिं वञ्चकं मत्वा धनमखिलं सुबुद्धये दापयित्वा दुर्बुद्धिमदण्डयत्. दुर्बुद्धिस्तु धनं

पितरं च नाशयित्वा दुःखभाजनमासीत्. तस्माज्जनः अन्यं वञ्चयितुं प्रवृत्तश्चेत्स्वयमेव नश्यति.

---

### ४४. सहोदरयोः पलिक्न्याः प्राड्विवाकस्य च कथा.

* यद्यस्ति सत्यं मनुजेषु दोष-
शङ्काशतेनापि न हानिरेषाम् ।
दिवि स्थिते पूषणि मेघबृन्द-
पिधानमात्रेण निश भवेत्किम् ॥

मधुरायां कश्चिद्धनवान्विप्रः वर्तते स्म. तस्य द्वौ पुत्रावास्तां. वृद्धः पिता केनापि व्याधिना कालधर्ममाप. सुतौ तद्रिक्थं विभज्य स्वस्वं भागं भस्त्रिकासु सम्पूर्य लाक्षया सम्मुद्र्य प्रतिवेशिन्याः कस्याश्चिज्जरठायाः वशे विन्यस्य उभावप्यावां यदा आगच्छेव, तदैतत्सर्वं देहीत्युक्त्वा गयादिपुण्यक्षेत्राण्युद्दिश्य प्रतस्थाते. अथ कनीयान्मार्गे क्वचिन्निद्रापरवशं भ्रातरमुत्सृज्य स्वपुरं प्राप्य आर्ये, मदग्रजं व्याघ्रश्चखाद, निर्गतिकोस्मि, हा भ्रातृहीनोस्मि, किं धनेन ? किं गृहेण; किमन्ततः प्राणैरिति तस्या अग्रे रुरोद. सा तं बहुधा समाश्वास्य धनं सर्वमपि प्रत्यर्प्य स्वस्थचित्तं चकार. ततस्सदेशान्तरं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



गत्वा निवसति स्म. कतिपयदिनानन्तरं ज्येष्ठस्समागत्य आर्ये, मदवरजः क्व गतोवा न जाने, अन्विष्यान्विष्य व्यरंसिषमित्युक्त्वा तां धनमयाचत. चित्रीयमाणचित्ता सा त्वदवरजः कतिपयदिनेभ्यः पूर्वमागत्य भवान्व्याघ्रसादभूदित्युक्त्वा धनमखिलं प्रतिजगृहे खल्विति जगाद. तदा स ज्यायानतीव कुपितस्सन् इयं मामवञ्चयतेति प्राड्विवाकाय व्यजिज्ञपत्. स तत्सर्वं विचार्य साध्वीयं वञ्चिताभूदिति निश्चित्य एवं व्यवस्थापयति स्म. द्वावप्यागत्य धनं ग्रहीष्याव इति खलु भवद्भ्यामुक्तं, इदानीमपि तथैवागत्य द्वाभ्यां एकदैव ग्रहीतव्यं धनमिति. ततस्स तूष्णीमनुजमन्वेष्टुं जगाम. सा वृद्धा हर्षेण स्वगृहमाजगाम. तस्मान्न्यायमार्गे चरतां जनानां न कदापि हानिर्भवति,

---

### ४५ कृपणयोः कथा.

दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥

यवनदेशे अतिलुब्धेन महालुब्धेन च द्वाभ्यामभावि.

अतिलुब्धः परान्नेनैव जीवन्कदाचिन्मध्याह्नसमये महालुब्धगृहमयासीत्. महालुब्धस्त्वागतमतिथिं मधुरमधुरैर्वचनैस्सँल्लप्य शुष्कोपचारैरेवाऽनन्दयामास. ततस्तेन सह विपणिं गत्वा तत्र कस्मिंश्चिदापणे समीचीना अपूपास्सन्ति किमिति पप्रच्छ. स वणिगार्य, नवनीतवन्मृदुलास्सन्ति, पश्येत्याचख्यौ. तच्छ्रुत्वा महालुब्धः अतिथे, तर्हि नवनीतमेव वरं, तदेव गृह्णीवइत्युक्त्वा नवनीतनिषद्यामासाद्य समीचीनमस्तिवेत्यपृच्छत्. स आपणिकः तैलवत्सस्नेहं सद्वर्तते, इत्याहस्म. अयन्तु तर्हि तैलमेव वरमित्युक्त्वा तैलापणमेत्य पूर्ववत्पप्रच्छ. तत्रत्यस्तैलं जलमिव स्वच्छं वर्तते, पश्येत्यदर्शयत्. स तच्छ्रुत्वा तर्हि जलमेव सर्वोत्तममिति सिद्धान्तयित्वा अतिथिं स्वभवनमुपनीय इदमेव सर्वोत्तमं गृहाणेति निगद्य जलमेव प्रादात्. अतिलुब्धस्तु अन्नालाभेपि इयं विद्या सम्यगभ्यस्तप्राया अभूत्, अयमेव परमो लाभ इति मत्वा जगाम. तस्मात्कृपणाः येनकेनाप्युपायेन अव्ययमार्गानेव चिन्तयन्ति.

---



### ४६ राज्ञस्तत्कुमारत्रयस्यच कथा.

यो यत्र कुशलः कार्ये तत्र तं विनियोजयेत् ।
कार्येष्वदृष्टकर्मा यश्शास्त्रज्ञोपि विमुह्यति ॥

चोलदेशे द्विजकीर्तिनामा प्रभुरवसत्. तस्य त्रयः पुत्रास्सम्बभूवुः. स प्रभुस्स्वयमतिवृद्धतया एवमचिन्तयत्, स्वतनयेषु राज्यार्हाय कस्मैचित् स्वं राज्यं दातव्यमिति. ततस्तानाहूय तत्तद्योग्यतापरीक्षणाय गिरमित्थमुदैरयत, वत्साः, भवतां सुखवर्तनान्युद्दिश्य पृच्छामि, निवेदयत, कस्यकस्य कानिकान्यभीप्सितानीति. तदाकर्ण्य ज्येष्ठः शृण्वन्तु तातपादाः, सर्वदाहं तार्किकान्वैयाकरणानालङ्कारिकान्मीमांसकान्पौराणिकांश्च समीपे स्थापयन् तत्तद्ग्रन्थविचारणैः कालं यापयितुमिच्छामि इत्याचष्ट. द्वितीयस्तु नितरां द्रव्यं सम्पादयन् देशाटनं कुर्यामित्यपेक्षा मम वर्तते, इत्याह स्म. तृतीयस्तु बह्वीस्सेनाः संयोज्य बहूनि राज्यानि सम्पाद्य सम्यक्प्रजाः परिपालयन्कीर्तिमुपार्जयेयमिति स्वकुतूहलमाचष्ट. ततो वृद्धस्स महाराजः प्रथमद्वितीययोर्यथेच्छं धनादिकं दत्त्वा तत्तदभिप्रायानुरूपं सर्वमनुकूलयित्वा प्रेषयामास. चरमं सुतमेव राज्यभारार्हं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

मत्वा तमेव राज्याधिपतिमतानीत्. तेन संरक्षिताः प्रजास्समानन्दुः. तस्मादेवं तत्तदर्हतामालोच्याधिकाराः प्रदातव्याः.

---

### ४७ रजकरासभयोश्शुनकस्य च कथा.

परानुरूपं यः कार्यं कुर्यात्स्वामिहितेच्छया ।
स विषीदति चीत्काराात्ताडितो गर्दभो यथा ॥

वाराणस्यां कश्चिद्रजकस्समवर्तत. तन्निकटे एको गर्दभश्श्वाचावर्तेतां. तस्मिन्रजके कस्याञ्चिद्रात्रौ गृहाभ्यन्तरे निद्राणे केचिच्चोरास्समागत्य तद्गृहभित्तिं कर्तर्योत्कीर्य बिलं कुर्वन्तः आसन्. तदा स शुनकस्तद्गृहे नावर्तिष्ट. सन्निहितस्तु स रासभस्तत्सर्वमालोक्य स्वयमेवमालोचयामास,

अहो! चोराः प्रविष्टाः, स्वामी तु निद्राति, शुनकस्समीपे अवर्तिष्यत चेत्स्वामिनमबोधयिष्यदेव, स क्वगतो वा न जाने; इदानीमहमेव वा स्वामिनं प्रबोध्य तस्योपकरोमि, अन्यथा स्वामिद्रोही स्यामिति. तदनन्तरं तत्प्रबोधनार्थं स्वयमेवोच्चैः ररास. तच्छ्रुत्वा रजकः किमेवमयमर्धरात्रे निद्राभङ्गं करोतीति कोपेनागत्य



दण्डमादाय तं प्रहृत्य पुनर्गृहं प्रविश्य सुष्वाप. चोरास्स्वकार्यं निर्वर्त्य भवनान्निरीयुः. तावच्छुनकस्समागत्य गृहाद्धावतश्चोरान्दृष्ट्वा मुहुर्मुहुरभषत्. तद्भषणं श्रुत्वा रजकस्संशय्य गृहं परितस्समालोकयत्. तद्बिलमालोक्य हा चोरैस्सर्वस्वमपि हृतमिति शुशोच. तावत्तस्कराः बहु दूरं जग्मुः. गर्दभस्य प्रहार एव प्रयोजनमभूत्. तस्मात्केनापि स्वानर्हे कार्ये न यतितव्यम्

---

### ४८. राज्ञः कीर्तिकामतत्पुत्रस्य च कथा.

विद्यागमार्थं पुत्रस्य वृत्त्यर्थं च यतेत यः ।
पुत्रं सदा साधु शास्ति प्रीतिकृत्स पिताऽनृणी ॥

पुरा पाञ्चालदेशे महावर्माभिधो महीपतिर्विद्योतते स्म. तस्य सुमतिर्नाम सुतस्समजायत. सोतीव बुद्धिमान्वर्तते स्म. स कौमारे वयसि स्थितस्सन् स्वपितरमालोक्य स्वामिन्मम महती कीर्तिरुपार्जनीयेत्युत्कण्ठते मनः, केन मार्गेण तत्प्राप्तिस्स्यादित्यपृच्छत्. राजा स्वसुतमालोक्य वत्स, त्वमद्यारभ्य क्षात्रं धर्ममनुसन्धाय सुखेन प्रजाःपरिपालय, अपिच भक्तिमान् गुरुषु दयावान्दीनेषु दाक्षिण्यवान्बन्धुषु अनुत्सेकवानै-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

श्वर्येषु च भव, निरर्थकं कस्याप्युपद्रवं मा कुरु, दाक्षिण्याद्धनलोभाद्वा न्यायान्यायौ मा व्यत्यासय, दरिद्रेभ्यो धनं देहि, धनवत्सु धनं दत्तमपि न विशेषकीर्तिकरं स्यात्, पश्य शुष्कीभवत्सु सस्येषु प्रदत्ता वृष्टिरेव मेघानां कीर्तिकरी न समुद्रोदकेषु दत्ता, तस्मादेतत्सर्वं मनसि निधाय प्रवर्तसे यदि, तव यावच्चन्द्रदिवाकरं कीर्तिः प्रचरेदेवेत्युपदिश्य स्वराज्याधिकारे तमभिषिषेच. ततस्स यथोपदेशं पृथिवीं पालयन् कीर्तिभाजनमासीत्. तस्मात्पितृभिर्बालाः एवमुपदिश्य, तदुत्साहान्वर्धयित्वा सन्मार्गे प्रवर्तयितव्याः.

## ४९ राजतापसयोः कथा.

* आर्तेषु धूर्तेष्वविमृश्य लोके
हितं न वाच्यं त्वहितं न वाच्यं ।
एरण्डको नाम मुनिप्रवीरो
हितोपदेशेन हतोभवत्प्राक् ।

महावीरो नाम गान्धारदेशाधिपतिरासीत्. स बहुधनव्ययं कृत्वा तालप्रमाणवारिवारणमेकयोजनायामं च तटाकमकल्पयत्. अतिवृष्ट्यां सत्यामपि तत्र जलानि नैवातिष्ठन्त. [illegible]

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



राजा नितान्तचिन्तया तान्तस्वान्तस्सन् तद्रोधस्यवतस्थे. तावदेरण्डनामा मुनिः प्रभुसमीपमेत्य सत्कृतस्सन् कुतश्चिन्तापरवश इव लक्ष्यसे इत्यपृच्छत्. नृपतिस्तस्मै नमस्कृत्य स्वामिन्नहमिमं तटाकं निरमापयं महावृष्ट्यामप्यत्र जलबिन्दुरपि नावतिष्ठते. तस्मादपकीर्तिभाजनमासमिति चिन्तयामीत्याहस्म. स मुनिः किञ्चिद्ध्यात्वा अहो ज्ञातमेतत्कारणं साहसादिगुणशालिनो राजर्षेर्महर्षेर्वा कण्ठरक्तेन संस्पृष्टमन्नमतत्यदेवतायै बलीकरोषि चेत् पूर्यतेऽयं तटाक इत्यवदत्. ततः प्रभुस्समालोच्य अयमेव तादृश इति निश्चित्य खड्गेन तन्मुनिकण्ठमेव छित्त्वा बलिकर्म निर्वर्तयामास. अथ तटाकः पुपूरे. राजा पूर्णमनोरथोऽभूत्. तस्मात्प्रभवो जनैः स्वाबाधकं कालोचितं च बोधनीयाः. अन्यथा स्वहानिरेव स्यात्.

## ५० राजमल्लयोः कथा.

* वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति ।
गर्जद्धना न वर्षन्ति न गर्जन्ति घनाघनाः ॥

पुरा वज्रजङ्घो नाम मल्लोऽविद्यत. सः मितविद्य-

तया कुत्रापि जीवनं सम्यगलभमानस्सन्मलयाल-
देशाधिपतेः सुन्दराभिधस्य समीपमाससाद. तत्र
समयं निरीक्ष्य महाराजं प्रणिपत्य विज्ञापयति स्म.
स्वामिन् खुरलीविद्यासमर्थोहं तव समीपे वस्तुमागतो
स्मि, तव पुत्रान् खुरलीविद्यानिपुणान्कुर्याम्, महावी-
रान्मल्लान्शतमप्येकदैव जयेयं, पर्वतानपि शिरसा
वहेयं, महाव्याघ्रानपि निगृह्णीयामिति. तच्छ्रुत्वा
राजा सुतरां विसिष्मिये. तावदेव नगराध्यक्षस्समा-
गत्य राजानं प्रणिपत्य महास्वामिन् नगरान्नातिदूरव-
र्तिनि पर्वते व्याघ्रादयो दुष्टसत्त्वास्समवेतास्सन्तः
पौरान्बहुधा बाधन्ते, पौरास्तु अये महावनवत्पर्वतस-
मीपे इदं पुरं वर्तते, अत्र स्थित्वा वयं निहता इति
प्रतिगृहं क्रोशन्तीति विज्ञापयामास. राजा किञ्चिदा-
लोच्य अयि मल्लाग्रेसर, त्वं पर्वतानपि वहेयमित्यवदः
किल, इमं गिरिं शिरसा धृत्वा दूरं नेतुं शक्नोषि कि-
मिति पप्रच्छ. स मल्लस्तु अहो किञ्चित्कालपर्यन्तं सुख-
भोजनं प्राप्तुमुपायः प्राप्तस्तदनन्तरं यद्भावि तद्भव-
त्वित्यालोच्य स्वामिन्पर्वतद्वयमपि भुजाभ्यां धृतवतो
मे जिह्वा एकं पर्वतं शिरसा वहेयमिति स्वामिसन्निधौ


ಪುಸ್ತಕದ ಸಂಖ್ಯೆ P2862

विज्ञापयितुं जिह्रेतीत्यकथयत्. राजा तु तर्हि त्वरस्वे-
त्युवाच. तच्छ्रुत्वा स पुनः प्रणम्य स्वामिन्बहुदिना-
दारभ्यैतादृशकार्याभावात् मम तत्पाटवं किञ्चित्कुण्ठित-
मिवास्ते, तस्मादेकसंवत्सरपर्यन्तमवधिः प्रदीयते चेदनु-
रूपाहारादिना देहं दृढीकृत्यैतत्कार्यं निर्वर्तयिष्यामी-
त्यकथयत्. तदाकर्ण्य स नृपतिस्तथैव भवत्वित्यङ्गी-
कृत्य तावत्पर्यन्तं तुभ्यं किं देयमित्यवादीत्. स तु प्रति-
दिनमेकैकं निष्कं दीयते चेत्तदेवालमिति न्यवेदयत्.
राजा तथैवादापयत्. स तदादि दिनेदिने मृष्टान्नादिकं
भोजंभोजं मदगजायते स्म. ततस्संवत्सरे पूर्णे राजा-
नं प्रति स्वामिन्नस्मिन्दिने गिरिं वहामि, तत्रभवद्भि-
स्सन्निहितैर्भवितव्यमित्याहस्म. राजा नितरां प्रहृष्य
सपरिवारस्तं प्रदेशमगात्. तदैतद्वृत्तान्तं कर्णाकर्णि-
कया श्रुत्वा तद्दिदृक्षवः पौरा जानपदाः ग्रामीणाश्च समा-
जग्मुः. तावदयं परिकरं दृढं बध्वा भुजावास्फाल्य
राजानं प्रति स्वामिन्नुर्वीधरं वोढुं सन्नद्धोस्मि, आज्ञा-
प्यन्तां सैनिकाः पर्वतमुद्धृत्य मच्छिरसि निधातुमित्या-
हस्म. तदा राजा विस्मित्य कथमिमे गिरिमुद्धर्तुं शक्नुयुः?
इत्यवदत्. मल्लस्तु स्वामिंस्तर्हि यद्यप्यहं मत्प्रतिज्ञानुरूपं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

शिरसा गिरिं वोढुं समर्थोऽस्मि तथाप्येतावद्भिरप्यनुद्धार्यमुत्क्षेप्तुं मम शक्तिरस्तिकिम् ? भवद्भिरेवालोच्यतामित्याहस्म. राजा लज्जितस्सन् गृहमगात्. तस्मादशक्यमपि साधयेयमिति वाक्पराक्रमशालिनां वचनं न विश्वसेत्.

### ५१ अधीश्वरस्य तत्सामन्तसचिवयोश्च कथा.

प्रणयादुपकाराद्वा यो विश्वसिति शत्रुषु ।
प्रसुप्त इव वृक्षाग्रात्पतितः प्रतिबुध्यते ॥

बङ्गालदेशे कश्चिद्राजाऽवर्तत. स महान्तं सालं निर्माप्य ससैन्यः तद्दुर्गमेवाधिवसतिस्म. तस्माच्छत्रुभिरजय्योभूत्. सर्वे च राजानस्तस्मै करान्ददत आसन्. एवं स्थिते कश्चित्पार्ष्णिग्राहस्तमधीश्वरं येनकेनाप्युपायेन सालाद्बहिरानीय निगृह्णीयामिति रन्ध्रान्वेषी सन् तस्मिन्मित्रायते स्म. कदाचित्स राजानमेत्य स्वामिन् श्वः मत्पुत्रस्य विवाहो भविष्यति, तस्मिन्काले भवद्भिर्मद्गृहं प्रत्यागन्तव्यं, यदि मय्यनुग्रहस्तर्ह्येवं क्रियतां, अन्यथा विज्ञापयितुमशक्तोस्मीति प्रार्थयतेस्म. तदाकर्ण्य राजा तथेत्यङ्गीकृत्य तद्गृहं जिगमिषुरासीत्. तावत्तद-



मात्यस्समागत्य स्वामिन्शत्रुमन्दिरगमनमसांप्रतं. मित्रायमाणोप्ययं भवज्जिघृक्षया एवमुपायमकल्पयदित्यादि बहुधा तमबोधयत्. तथापि स राजा मन्त्रिवचनमनादृत्य विवाहगेहायितं तद्गेहमगात्. स पार्ष्णिग्राहस्सविनयं राजानं प्रत्युद्गम्य स्ववेश्म प्रवेश्य सेनाभिस्तं तत्रैव रुरोध. ततस्तदीयं राज्यं स्वाधीनमकरोत्. तस्मादिष्टस्य वचनं नोल्लङ्घयेत्. मित्रायमाणस्यापि शत्रोर्वचनं न विश्वसेत्.

### ५२ काकमयूरकथा.

आजननादामरणादभ्यस्यतु वायसस्तपस्यतु वा ॥
केकिवदेकां केकां कोकिलवत्पञ्चमं च किं कूजेत् ॥
आत्मपक्षपरित्यागात्परपक्षे च यो रतः ।
स परैर्हन्यते मूढः काकः केकिकुलैरिव ॥

वृन्दावने कस्य चिदश्वत्थस्योपरि केचिद्वायसाः नीडानि निर्माय तेषु स्वशावकैस्सह सुखेन वसन्तिस्म. तत्समीपे कस्य चिद्वटस्योपरि केचिन्मयूराश्चावसन्. तेषु काकेष्वेकस्तान्बर्हिणः स्वजातीयांश्चालोक्य स्वजात्यपेक्षया मायूरी जातिरेव श्रेष्ठेत्यालोचयामास. ततस्स्वजातिं विकृत्य वटस्याधः पतितानि बर्हिबर्हाणि संगृह्य

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

स्वपक्षेषु संयोज्याहं मयूरोभवमिति धिया तैस्सह संचरतेस्म. अथ कदाचिन्मयूरास्तत्स्वरं श्रुत्वा अयं काकः अस्मान्वञ्चयितुमागतइति निश्चित्य नखैस्तुण्डैश्च तत्तनुं विदीर्य सव्रणीकुर्वन्तस्तं निरकासयन् स काकस्तान् विहाय पुनस्स्वसंघसमीपमगमत्. ते वायसास्तमालोक्य, अये त्वमस्मान्निराकृत्य यान्मयूरानगमः, श्रेष्ठेषु तेष्वेव वस, अस्मान् मा स्पृशेति स्वयूथादुत्सारयामासुः. तदा स काकस्स्वयमेकाकी बभूव. तस्माद्यस्स्वपक्षमुपेक्ष्य परपक्षमपेक्षते स एवमितोभ्रष्टस्ततोभ्रष्टश्च भवति.

### ५३ तेन्नालरामकृष्णस्य रजकस्य च कथा.

* उपायशाली मनुजो नापायविषयो भवेत् ।
एलामदन् भोजनादौ विषयोगेपि निर्भयः ॥

तेन्नालरामकृष्णः कदाचिदच्युतराजसमीपे किञ्चिदनुचितं हास्यमाततान. राजा क्रुद्धस्सन् रामकृष्णस्य शिरो मदगजपदेन मर्दयतेति भटानवादीत्. ते तमादाय ग्रामाद्बहिर्विशालं चत्वरमासेदुः. तत्र खनित्रेण भूमिं खात्वा तस्मिन्गर्ते तमाकण्ठं निचख्नुः. ततस्तेषु गजमानेतुं किञ्चिद्दूरं गतवत्सु एकः कुब्जो रजकस्तं देशमाययौ. स तं दृष्ट्वा कुतएवं निखातोसीति पप्रच्छ. रामकृष्णस्तु अये रजक, त्वमिवाहमपि वक्रतनुरभवं, कश्चिद्वैद्यः मां दृष्ट्वा मद्वपुषो वक्रतामपनेतुमिमां चिकित्सां कारयामास, एतदवटस्थेनानुकूलोष्मणा मत्तनुरिदानीमृज्वी बभूव, अहो मादृशेषु स भिषगेव निपुणः, इयं भूमिरेव चिकित्सितुमनुकूलोष्मवती, दैववशाद्विकृतदशायाः परिमुक्तोस्मि, मत्काये आर्जवमायातं वा न वा मामुद्धृत्य त्वमेव परीक्षस्वेत्यवादीत्. ततस्स एनमुद्धृत्य दृष्ट्वा स्वामिन्मामप्येवं कुर्विति प्रार्थयते स्म. तमेष तस्मिन्गर्ते कण्ठपर्यन्तं मृद्भिर्दृढं पिधाय तत्पटभारैस्सह राजसन्निधिमाययौ. राजा तमालोक्य कथं तान्वञ्चयित्वा समायातोसीत्यपृच्छत्. स तद्वृत्तान्तमखिलं यथाक्रमं विज्ञापितवान्. राजा तद्बुद्धिपाटवं श्रुत्वा विस्मित्य तस्य यथापुरं दयतेस्म. तं रजकं च मोचयामास. तस्मादेवं बुद्धिशालिनः अपायानप्युपायेन तरन्ति.



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## ५४ शूद्रैर्वञ्चितस्य ब्राह्मणस्य कथा.

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागलो यथा ॥

ताम्रपर्णीतीरे श्रीरामपुराभिधेऽग्रहारे वसन्तसोमयाजीति कश्चित् ब्राह्मणोऽविद्यत. स कदाचित्पौण्डरीकेण यष्टव्यमित्यालोच्य ग्रामान्तरं गत्वा सलक्षणान्पशून्नानयन्नासीत्. तावत्केचिच्छूद्राः तान्छागानपहरेमेत्यालोचयन्ति स्म. तेष्वेकः ब्राह्मणाभिमुखमागत्य भोः ब्रह्मन् कुतः इमानलर्कानादाय गच्छसीति पप्रच्छ. स विप्रस्तु नेमे शुनकाः, किन्तु पश्य, छागाः, यज्ञार्थं हरामीत्यवोचत्. ततस्तस्य किञ्चिद्दूरगमनानन्तरमन्यो वृषलः पुरतस्समागत्य ब्रह्मन् भ्रान्तोसि किं? ब्राह्मणोपि शुनस्स्पृशन् नयसीत्यवोचत्. स द्विजः किञ्चित्संशयालुस्सन् तूष्णीं किञ्चिद्दूरं जगाम. तावदपरश्शूद्रस्सन्निधाय अरे, कस्त्वं पथि उन्मत्तान्शुनकान्किमर्थमानयसि? यं वा कं वा इमे दशन्ति चेत्किं करोषि, उत्सृजोत्सृज इत्यधिक्षिपति स्म. स द्विजातिस्सत्यमेते शुनकाएव, न च्छागाः, अन्यथा द्रष्टारस्सर्वेपि कथमेवं वदेयुरिति निश्चित्य तांस्तत्रैव त्यक्त्वा

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



जगाम. ते शूद्रास्तानादाय जग्मुः. तस्माद्बहूनामैकमत्ये धीमानपि तैर्वशीक्रियेतैव.

## ५५ परस्परं वञ्चितयोश्शूद्रयोः कथा.

* स परेणैव वञ्च्येत प्रवृत्तः परवञ्चने ।
अन्योन्यवञ्चनासक्तौ वणिजौ वञ्चितौ मिथः ॥

याचवरनामनि नगरे सैकतपणितेति कश्चिच्छूद्रोऽवर्तिष्ट. स कदाचिद्ग्रामान्तरं जिगमिषुरेकमानपरिमितास्सिकतास्सिचये बध्वा प्रतस्थे. माचवरनामनि तत्समीपग्रामे गोमयपणितेति कश्चिच्छूद्रोऽवर्तत. सोप्यन्यग्रामं यियासुस्स्ववस्त्राञ्चले पञ्चमानपरिमितं गोमयं बध्नन् प्रययौ. सन्ध्यायां तावुभावपि मार्गवशादेकं ग्राममेत्य तत्र क्वचित्सत्त्रशालायाममिलतां. तदा स सैकतपणिता गोमयपणितुः ग्रन्थिमालोक्य अयमन्नग्रन्थिरेव उपायेनैनमनुज्ञाप्यैतदोदनमपहरेयं, तेन सुखभोजनं भवेदिति मनसि अचिन्तयत्. गोमयपणितापि सैकतपणितुः पाथेयभारमवलोक्य अयं तण्डुलग्रन्थिरेव ? यथाकथञ्चिदयमपहर्तव्य इत्यालोचयत. ततः प्रथमो द्वितीयं प्रति अज्ञ, पथिकानामहमेव मूढः, पश्य,

प्रयाणकाले भक्तं विहाय तण्डुलानाहृत्येदानीं क्षुधा पीड्ये इति व्याजहार. तच्छ्रुत्वा द्वितीयस्त्वहो मत्पाथेयमन्नं मत्वाऽयमेवं व्याहरतीति निश्चित्य तं प्रत्येवमाहस्म. भोः, अहमन्नमुपाहरं, मम क्षुन्नास्ति, तवाभिमतं चेदिदं गृहीत्वा त्वत्तण्डुलान् देहीति. स प्रहृष्यानुमेने. ततस्तौ स्वस्वपाथेयग्रन्थी अविस्रस्यैव विनिमित्य पृथक् विभिन्नाभ्यां मार्गाभ्यां परस्परभिया अगमतां. ततस्तौ स्वस्वभारग्रन्थिं विस्रस्य दृष्ट्वा परस्परं विसिष्मियाते. तस्माज्जनो वञ्चकश्चेत्स्वयमपि केनापि वञ्च्येतैव.

---

## ५६ बकमत्स्यकथा.

शत्रून्परित्यजेद्दूरं गूढनक्रानिव ह्रदान् ।
यस्तु तान्विश्वसेन्मोहात्तस्य नाशो भवेद्ध्रुवम् ॥

पुरा विमलावतीनामनि सरसि नानाविधाः मत्स्याः चिरान्निवसन्तिस्म. जात्वेको बकः तत्सरस्संप्राप्य तत्रस्थान् झषानालोक्य यथा कथञ्चिदेते मया खादनीयाः, इत्यालोच्य जलोपान्तप्रदेशे उपाविशत्, तदा ते मीनास्तं बकमुद्वीक्ष्य भयाद्दूरं धावन्तिस्म. बकस्तु



धावतस्तान्प्रति हे मत्स्याः, किमर्थं दूरं प्रधावथ ? मद्वदनप्रविष्टानपि युष्मानहं न भक्षयामि, शृणुत, आबाल्यान्मया बहुशः प्राणिहिंसा अकारि, ततएवास्मत्कुलक्षयो जातः, वृद्धश्चाभवं, तस्मादहमिदानीमतिविरक्तीभूय इतःपरं कदापि प्राणिहिंसनं न करिष्यामीति प्रतिज्ञामकार्षं, तपस्यन्नद्य निरशनव्रतमप्यकलयमित्यवोचत्. तच्छ्रुत्वा ते मत्स्याः किञ्चित्प्रत्ययमेत्य क्रमेण निर्भीकास्सन्तस्तत्समीपएव चेलुः. बकस्तु समीपगतानपि तानतिविश्वासपूर्वकं पश्यन्कतिपयदिनानि तत्सख्यमेवाभिनयतिस्म. ततः कदाचिच्चिन्ताक्रान्तमिव तिष्ठन्तं बकमालोक्य ते मत्स्यास्सर्वेपि पक्षिसार्वभौम, कुतः खिद्यमानइवालक्ष्यसे ? इति पप्रच्छुः. बकस्तु श्रूयतां मित्रैरितःपरं द्वादशवत्सरान् अनावृष्टिर्भविष्यति, तदा सर्वास्सरितस्सरांसि च शुष्कीभविष्यन्ति, तदा जलाभावाद्युष्माकं महाविपत्तिस्सम्भवेदिति मित्रव्यसनमालोच्य शोचामीत्यब्रवीत्. तदाकर्ण्य भीतास्ते सर्वे यत्रकुत्र वा निर्बाधं सरस्समुद्रं वा अस्मान्नयेति तं प्रार्थयन्ते स्म. बकस्सन्तुष्य अशोष्यं किञ्चित्सरोवरमस्ति, तद्वः प्रापयामि, मा बिभीतेत्युक्त्वा एकैकं क्रमेण

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ग्राहंग्राहं दूरं नीत्वा सर्वानप्यभक्षयत्. तस्माच्छत्रुभिरतिहितमुक्तमपि तन्न विश्वसेत्.

---

### ५७ ब्राह्मणस्य व्याघ्रहरिणानां च कथाः

* अनुकूलपवनयोगाज्जडमप्यभ्रं सुजीवनं दिशति ।
चण्डानिलानुषङ्गे गर्जन्नशनीन्सएव पर्जन्यः ॥

श्रीनगरनामनि पुरे देवशर्माभिधो ब्राह्मणः आसीत्. सः दरिद्रतया तत्रतत्र भिक्षामटन् लब्धैस्तण्डुलादिभिरात्मपत्नीपुत्रादीन् रक्षन् स्वधर्मेणावर्तिष्ट. स कदाचित्समित्कुशाद्याहरणार्थमरण्यानीं गत्वा तत्रैकं व्याघ्रं ददर्श तदा नितरां भीत्वा दिग्भ्रान्तस्सन्प्राकम्पत. तावच्छार्दूलानुजीविनौ हरिणावेनमालोक्य ब्राह्मणोयमतिभीत इति निश्चित्य शार्दूलं प्रति स्वामिन्शार्दूलचक्रवर्तिन्, दरिद्रोयं ब्राह्मणस्तव प्रसादमाकाङ्क्षन् त्वत्सन्निधिमागत इति निवेदयामासतुः; तदाकर्ण्य व्याघ्रस्सन्तुष्य निकटस्थानि स्वखादितनराणामाभरणानि तस्मै दत्त्वा कृष्णसाराभ्यामुपश्लाध्यमानः तं विप्रं गृहं प्राति प्राहिणोत्. एतत्सर्वं श्रुत्वा तत्प्रातिवेशिकः स्वयमप्येवं धनवान्भवेयमित्यालोच्य तद्व्याघ्रसमीपमाययौ. तदा व्याघ्रसमीपे

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



द्वौ जम्बुकाववर्तेतां. तावेतमालोक्य यथाकथञ्चिदेष आवाभ्यां भक्षणीय इत्यालोच्य व्याघ्रं प्रति स्वामिन् क्रव्यादचूडामणे, अस्मददृष्टवशात्पुरतः कोपि मनुजस्समायाति, तव क्षुच्छान्तेरयमेव काल इति व्यजिज्ञपताम्. तदा स व्याघ्रस्त्वरितमागत्य तं गृहीत्वा चखाद. अवशिष्टानि मांसानि तावभक्षयताम्. तस्मात्प्रभूणां समीपे सज्जनाः स्थिताश्चेदेवं परोपकारस्सम्भवेत्. दुर्जना स्थिताश्चेदेवं परापकारएव सम्भवेत्.

---

### ५८ तेन्नालरामकृष्णस्य राजसेवकयोश्च कथा

* उपायेनापदस्तीर्त्वा प्राज्ञस्सुखमवाप्नुयात् ।
वेतसस्स्रोतसो वेगेप्यानम्योद्भ्रियते पुनः ॥

एकदा तेन्नालरामकृष्णः कृष्णराजसमीपे किमप्यनुचितं हास्यमतानीत्. तेन राजा कुपितस्सन् तच्छिरश्छिन्तमिति स्वसेवकावादिदेश. तौ तमादाय ग्रामाद्बहिश्श्वत्वरमगमताम्. ततो रामकृष्णस्तौ प्रति सविनयमाहस्म. हेभद्रौ, मम भाग्यविपर्ययादेवमभूत्, अस्तुनाम, मृतस्यापि मम यथासद्गतिर्भवेत्तथा भवद्भिरुपकारः

कर्तव्यः, अहं तावदस्मिंस्तटाके कण्ठपर्यन्तमवगाह्य मदिष्टदेवतां ध्यात्वा हुङ्करिष्यामि,तदनुपदमेव मत्कण्ठमुभावपि छिन्तं, एतावत्प्रार्थय इति. तद्वचनं तौ तथेत्यङ्गीचक्रतुः. ततस्सरामकृष्णस्तं तटाकमवगाह्य तयोर्मध्यस्थस्सन्नेव देवताध्यानमभिनीय हुङ्कृत्य जले ममज्ज. ततस्तौ सरभसमेकदैव प्रसारितखड्गतया परस्परखड्गाभ्यां निहतौ द्वावप्यम्रियेताम्. रामकृष्णस्तु राजानमेत्य स्वचातुर्यक्रममूचे. राजा विस्मित्य तस्मै प्रसन्नोऽभूत्. तस्मात् कुशलाः अपराध्याप्येवमात्मानं मोचयन्ति.

## ५९ गजगोमायुकथा.

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः
मदोन्मत्ता महानागाः पश्य क्रोष्ट्रा प्रधाविताः ॥

पुरा दक्षिणदेशे द्वादशवर्षाण्यनावृष्टिरासीत्. तदा जलाशयास्सर्वेपि शुष्कीभवन्ति स्म. तस्मात्तत्रत्या गजास्सर्वे सङ्घीभूय जलसमृद्धदेशान्गच्छामेति प्रस्थाय मार्गे चन्द्रपुष्करिणीं नाम पुष्करिणीमालोक्य तामभितः काननेषु वसन्तिस्म. ततःप्रभृ[illegible]



काले पुष्करिण्यास्समीपस्थाः केचिज्जम्बुकाः करिपादाभिघातैरम्रियन्त. तस्मात्सर्वे जम्बुकास्सङ्घीभूय इमे द्विपाः अस्मात्प्रदेशादुत्सारणीयाः, कथमेतत्कार्यं भवेदित्यालोचयन्ति स्म. तेष्वेको जम्बुकः अहमेतानुत्सारयामि, पश्यत मच्छक्तिमित्युक्त्वा, गिरिशिखरमारुह्य गजानेवमाह स्म, अये दन्तिनः, इतःपरं युष्माभिरत्र न वस्तव्यं अस्यां सरस्यां प्रतिदिनमपि जगत्पतिश्चन्द्रः जलक्रीडां करोति, सोद्य युष्माकं दुर्गन्धमसंहमानस्सन् युष्मान्प्रति इमे गजा इतःपरं मत्पुष्करिणीं प्रविशन्तिचेदेतान् मकरा गृण्हन्तु अस्मिन्वने वसन्तिचेदेतान्सिंहा स्संहरन्त्विति शशाप, इमं वृत्तान्तं भवतां सूचयितुं स मां प्राहिणोत्, पश्यत, अद्याप्यत्रैव विहरतीति. तद्वचनमाकर्ण्य ते गजास्तत्परीक्षणीयमिति सरोवरं ददृशुः. तत्र चन्द्रप्रतिबिम्बं जलतरङ्गेषु चलितमिवालोकि. ते तद्दृष्ट्वा अहो बत सत्यमेतत्सर्वमपीति प्रभीता स्सन्तस्तं देशं विहाय जग्मुः. तस्मादुपायवतां असाध्यमपि कार्यं सुसाधमेव भवति.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## ६० मत्स्यत्रयकथा.

अनागतविधाता च प्रत्युत्पन्नमति स्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥

कस्यां चित्सरस्यां त्रयो मत्स्यास्सन्ति स्म. तेष्वेकः कुशलतमः. कदाचित्स समालोच्य इतरौ प्रत्यवदत्. अयि सखायौ, शृणुतामिदानीं ग्रीष्मर्तुस्समजनि, इतः परमेतत्पल्वलं निरापं भविष्यति, तस्मादिदानीमेव अशोष्यं ह्रदं समुद्रं वा प्रविशाम, नोचेदस्माकमत्याहितं भवेदसंशयमिति. तदाकर्ण्य तौ कोयं बकबन्धनोपायः किमेवं वृथा सम्भावयसि, गच्छगच्छेति तं निराचक्रतुः. ततस्स कुशलो मत्स्यः प्रवाहमार्गमाश्रित्य वारिधिमविशत्. अन्यावत्रैवावसतां. ततः क्रमेण सरसि शुष्कीभवति दाशास्समेत्य बडिशं प्रसार्य द्वावपि गृहीत्वा तटे निचिक्षिपुः. तदैकः मृतवदास्त. अन्यस्तु तत्रतत्र लुठति स्म. लुठन्तमालोक्य ते कैवर्तास्तं पाषाणोपरि निपात्य संहरन्ति स्म. अपरस्तु उपायेन जलं प्रविश्य कस्मिंश्चित्कोटरे निलीयते स्म. तस्मादापतिष्यन्त्याः विपदः प्रतीकारं निपुणाः पूर्वमेव समालोचयन्ति. मध्यमास्तु आपतितानां विपदां तमालोचयन्ति. मन्दास्त्वनुभवन्त्येव.



## ६१ अवग्रहग्रस्तबकमीनकथा

* स्वीयमायमनालोच्य व्यययेद्यस्स्ववाञ्छया ।
परिक्षीयत एवाशु धनी श्रीदसमोपि सः ॥

कस्यचित्तटाकस्य तटे महान् तिन्त्रिणीतरुरवर्तिष्ट. तदुपरि कश्चिज्जरठो बकश्चिरान्निवसति स्म. स तु दूरगमनाशक्ततया तत्तटाकस्थान्मत्स्यान् भक्षयन्नासिष्ट. एवं स्थिते कदाचिदवग्रहवशात्तत्रतत्र तटाकादिषु शुष्कीभवत्सु निराहारतया समुद्रं यियासवः परश्शताः पक्षिणस्तन्मार्गेण समाजग्मुः. तानालोक्य स वृद्धो बकः प्रीतिपूर्वकमित्थमुवाच, अहो कृतार्थोस्मि, चिराद्बन्धुसन्दर्शनं जातं, आयात, इमान् तटाकस्थान् जलचरान् गृहीत्वा भक्षयत, इदं जलं पिबत, अस्मिंस्तरौ निवसतेति. तदाकर्ण्य ते खगास्तं प्रति भो वृद्ध, वयमेतावन्तः त्वद्वचनानुरोधेन अत्रत्यान् जलचरान्भक्षयितुं प्रवृत्ताः यदि तटाके एकोपि जन्तुर्नावशिष्यते, ततस्तवाहारः दुर्लभस्स्यात् वृद्धस्त्वमत्रैव क्षुधा पीडितस्सन् मरिष्यसि, तस्मादस्मान् विसृज, इति जगदुः. तथापि स बकस्तान्नगन्तव्यमस्मिन्दिनेऽत्रैव वस्तव्यमिति बहुधा निर्बन्ध्य. निर्बन्धमङ्गीकृत्य तत्रत्यान् जल-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

चरान् सर्वानपि भक्षयित्वा प्रातस्तमनुज्ञाप्य जग्मुः. अपरेद्युस्स तटाके सर्वत्र विचित्यापि कश्चिदप्याहारमलभमानस्सन् स्थलान्तरगमनाशक्ततया त्रिचतुरदिनानन्तरं तत्रैव ममार. तस्माज्जनः स्वजीवनमनालोच्य सर्वस्वमपि व्यययेत चेत्, एवमचिरादेव नश्येत्.

### ६२ वणिक्पुत्रकथा

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति ॥
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥

महिलापुरनामनि राजधान्यां कश्चिद्वणिगवसत्. तस्य चन्द्रमुखीति पत्नी समभवत्. तयोस्सुमतिर्नाम पुत्रस्समजनि. तस्य पञ्चमेवर्षे स वणिगम्रियत तत्पत्नीत्वात्मनश्शिशोश्च त्रातारमपश्यन्ती स्वपतेस्सखायं कश्चिद्वणिजमेत्य भ्रातर्निश्शरणास्मीति निवेदयामास. स तामालोक्य मातः, पुत्रवत्यास्तव कुतश्शोकः ? त्वत्पुत्रः यावत् त्वद्रक्षणक्षमस्स्यात्, तावन्मद्गृहे वस, मा भैषीरित्याश्वासयामास. सा सती तत्रैव निवसन्ती

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



सती पुत्रस्य विद्याभ्यासं कारयामास. दिनेदिने स विद्यामभ्यस्य क्षिप्रमेव पठने लेखनेच निपुणोऽभवत्. अथ कौमारे वयसि वर्तमानं योग्यतमं पुत्रमालोक्य सा नारी वत्स, विद्यावानसि, इतःपरं सर्वदाप्यत्रैव स्थितिरावयोर्नोचिता, अस्मत्पौर्विकास्सर्वेपि वाणिज्येनैव जीवन्तिस्स, त्वमपि तत्रैव यतस्व, शृणु, कुण्डिनपत्तने धनपालको नाम श्रेष्ठी स्वजातीयानां वृद्धिं विना मूलधनं दत्त्वा तान् वाणिज्ये व्यापारयतीति श्रुतवत्यस्मि, गच्छ, तमाश्रित्य तस्माद्धनमादाय वाणिज्यं कुरु, यत्रकुत्रवा स्वातन्त्र्येण वर्तावहै, इत्यवदत्. स बालस्तथेत्यङ्गीकृत्य धनपालकसमीपमगात्. तावत्स धनपालकस्तु स्वदत्तमखिलं धनं व्यययित्वा पुनःपुनः धनं देहीति याचमानं वणिजमेकमालोक्य अये दत्तं सर्वं नाशयसि, किञ्चिदपि न प्रत्यर्पयसि, कथं पुनःपुनर्बाधसे ? निपुणश्चेद्वणिक् मृतेन मूषकेणापि वाणिज्यं कृत्वा सुखीभवति, त्वं पुनर्मूढतम इति तं धिक्कुर्वन्नासीत्. अयं बालस्तमालोक्य मम मृतं मूषकं वा दापयेति तमयाचत. स श्रेष्ठीत्वयं मामुपहसतीति मत्वा मृतं मूषकम[illegible] कुत्रचिद्दीर्घ्यामुपावि-

शत्. तत्रैकस्समागत्य स्वपालितमार्जारस्य आहारार्थं एकमानपरिमितचणकाभ्यूषं दत्त्वा मूषकमक्रीणात्. स सुमतिः क्वचिन्मार्गे उपविश्य काष्ठभाराहर्तॄणां किञ्चित्किञ्चिदभ्यूषं जलं च ददासीत्. तत्र तैरेकैकं काष्ठं प्रदत्तं. स तत्सर्वं विक्रीय लब्धैर्धनैः काष्ठभारान्क्रीत्वा क्वचिन्निक्षिपति स्म. ततस्त्वेकमासं अतिवृष्टिवशात्काष्ठाभावे सति जनास्तदीयानि काष्ठानि बहुमूल्येनाक्रैषुः. तस्मात्सः बहूनि धनानि सम्पाद्य सुखेनावर्तिष्ट. तस्माज्जनो नैपुण्यशाली चेद्येनकेनापि प्रकारेण सुखी भवेदेव.

### ६३ पृथगध्यापितशुकशाबकयोः कथा

* सत्सङ्गतस्साधुगुणा भवन्ति दुस्सङ्गतो दुष्टगुणा भवन्ति ।
नदीषु तोयान्यमृतायितानि क्षाराणि तान्येव भवन्ति सिन्धौ

पुरा विन्ध्यपर्वते महान् वटवृक्षोऽविद्यत. तत्र चिराच्छुकदम्पती न्यवसताम्. तयोः रामलक्ष्मणनामानौ द्वौ शाबकावभवतां. एवंस्थिते कदाचित्कश्चिद्व्याधस्समागत्य वागुरां विस्तीर्य तच्छाबकद्वयमपि जग्राह. तदनु सः कार्यवशाद्गोदावरीतीरं गत्वा तत्रत्यब्राह्म-



णस्यैकं सौनिकस्य चैकं व्यक्रीणीत. स ब्राह्मणस्सौनिकश्चोभावपि तावादाय सम्यक्स्वस्वभाषाः अभ्यास्य प्रीत्या पुपुषतुः. तावज्जरठौ तौ शुकदंपती पुत्रावनालोक्य बहुधा निर्विद्य तद्विचिचीषया तानितानि तरुगिरिवनोपवनानि भ्रामंभ्राममायस्यन्तौ तत्रतत्र नगरग्रामपल्लीप्रासादगोपुरप्राकारप्रतोलीषु मार्गमार्गं प्रलपन्तौ तेषुतेषु वापीकूपतटाकसरित्समुद्रोपान्तेषु नीडानि दर्शंदर्शं उत्क्रोशन्तौ निर्निद्रौ निराहारौ निर्बलौ च भूत्वा क्रमेण गोदावरीतीरमवापतुः. तत्र द्विजस्य सौनिकस्य च सद्मनि पञ्जरयोः स्वशाबकावालोक्य प्रमोदार्णवमध्ये ममज्जतुः. ततस्तं विप्रमासाद्य तौ स्वामिन्निमौ बालकावास्माकौ. आवामनुगृह्य पुत्रभिक्षां देहीत्ययाचेतां. स विप्रस्तु वृद्धौ तावालोक्य दयायुतः स्वसमीपस्थं शुकं प्रत्यर्प्य सौनिकाय किञ्चिद्द्रव्यं दत्वा तत्रस्थमपि दापयामास. वृद्धौ तौ पुत्राभ्यां सह प्रमोदेन प्रस्थाय स्वनिवासस्थाने सुखेन न्यवसताम्. अथ किञ्चित्काले गते वृद्धौ तौ कालधर्ममवापतुः. ततस्तयो रामलक्ष्मणयोः एकत्र वासस्यासङ्घटिततया रामशुकस्समीप एव कश्चि-[illegible] निवसति स्म. एवं स्थिते कदाचित्काशीं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यियासुरेको ब्राह्मणः पथि चारंचारमातपेन सन्तप्यमानो लक्ष्मणशुकावासतरोरधस्ताच्छायायामुपाविशत्. तमालोक्य लक्ष्मणः पक्षिणस्समाहूय रे रे खगाः, समायात, समायात, अत्र कोपि मनुजस्तिष्ठति, एनं परिवारयत, एतन्नेत्रतारके तुण्डैरुत्पाटयत, नखैरैस्तनुं विदारयत, आन्त्राणि समाकर्षत, शोणितं पिबाम, मांसानि खादामेत्युच्चैरवदत्. तदाकर्ण्य भीत्या स विप्रस्तस्मात्प्रदेशाद्धावंधावं रामशुकावासतरुतलमशिश्रयत्. स रामस्तं दृष्ट्वा ब्रह्मन् एहि, आतपेन कियदायस्तोसि वा न जाने, अत्रोपविश, इदं फलं भक्षय, एतज्जलं पिब, अत्र पल्लवतल्लजैस्तल्पं कल्पयामि, अत्र शेष्वेत्यादिना बहुधा तमुपचचार. तदा सः द्विजस्तं प्रति भोः शुक, त्वमेवं मामुपचरसि, तत्र कश्चिच्छुको मां हन्तुमुद्युक्तोभूत्, किमिदमाश्चर्यमिति पप्रच्छ. स रामस्तु द्विजवर श्रूयताम् आवामुभावपि भ्रातरौ, स सौनिकगृहे अवर्धत, अहं ब्राह्मणगुहे, तस्मात्तत्तत्स्वभावाएव आवयोरासन्नित्यकथयत्. स ब्राह्मणः युक्तमेवेत्युक्त्वा स्वकार्यार्थं जगाम. तस्माज्जनानां सत्सङ्गेसति सद्गुणा एव जायन्ते दुस्सङ्गे सति दुर्गुणा एव सम्भवति. * * * *



## ६४ राज्ञस्तदासपण्डितस्य च कथा

लोकतन्त्रानभिज्ञश्चेद्विद्वानप्यपकृष्यते ।
लवणेन विनाभूतं व्यञ्जनं गोमयायते ॥
चक्रं सेव्यं नृपस्सेव्यो न सेव्यः केवलो नृपः ।
चक्रस्यासेवनाज्जीवन् ब्राह्मणो भूततां गतः ॥

पुरा वीरमहेन्द्रो नाम कश्चिन्महीपतिः अवसत्. तत्सन्निधौ प्रियदर्शनो नाम महान्विद्वान् अवर्तत. स विद्वान् चतुर्दशकलाकोविदोपि लौकिकव्यवहारानभिज्ञस्सन्नवर्तत. अन्ये केचित्पण्डिताः स्वल्पज्ञा अपि लौकिकव्यवहारनिपुणतया स्वयं चतुष्षष्ट्यामपि कलासु पण्डिता इवासन्. राजा तु स्वयमखिलविद्याप्रवीणतया तत्तद्योग्यतामवधार्य तदातदा प्रियदर्शनमेव विशेषतस्सम्मानयन्नासीत्. तदसहिष्णवस्ते पण्डिताः प्रियदर्शनं द्विषन्तस्तस्मै सर्वथापि द्रोहमेव चिन्तयन्तश्चासन्. ते तदातदा राजसन्निधौ प्रियदर्शनं व्याजेन दूषयन्तश्चासन्. राजा तु स्वयमभिज्ञतया स महापण्डित इति दिनेदिने प्रियदर्शने प्रीतिमेव वर्धयति स्म. एवंस्थिते कदाचित्ते सङ्घीभूय समालोच्य द्वारपालकाय किञ्चिद्दत्तं दत्वा अये, तं प्रियदर्शनं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

राजभवनं मा प्रवेशय, केनाप्युपायेन परावर्तयेत्यवोचन्. स तथेत्यङ्गीकृत्य प्रातस्समागतं प्रियदर्शनमालोक्य विद्वन् ह्यः केनापि कारणेन राजा भवते क्रुद्धस्सन् श्वोवा परश्वोवा स समागमिष्यति चेत्तं मद्भवनद्वारमप्रवेश्यैव गलहस्तिकया नुदतेत्यस्मानाज्ञापयामास, तत्कारणं तु स एव जानीते, त्वमेव जानीषे, तस्मात्परावृत्य भवतः पञ्चषदिनपर्यन्तं गृहे स्थितिरेव वरमिति प्रतिभाति, इतःपरं भवानेव प्रमाणमित्याहस्म. तदाकर्ण्य स विद्वान् सत्यमेवेदमिति निश्चित्य व्यथमानस्स्वगृहमेवागात्. अथ द्वित्रदिनानन्तरं राजा सभ्यान्प्रति पञ्चषदिनान्यारभ्य प्रियदर्शनं नैवापश्यं, क्वगत इति पप्रच्छ. तदा ते पण्डिताः स्वयमुत्थाय प्रभो, प्रियदर्शनः प्रबलेन व्याधिना पीडितस्सन् उत्थातुमप्यशक्तः स्वगृहमेवाधिशेत इति निवेदयन्ति स्म. तदाकर्ण्य राजा दुःखितः स्वभिषजमेकमाहूय तं चिकित्सितुं प्राहिणोत्. ते पण्डितास्तद्वैद्याय च किञ्चिद्धनं दत्त्वा स्वपक्षगतमेव चक्रुः. सोऽगदङ्कारः प्रभुसमीपमागत्य प्रभो बहुधा चिकित्सामकरवं, रोगस्तु प्रबलः, दैवयत्नः कथं वर्तते वा न जाने, इति मिथ्यैवावेदयामास.



तदाकर्ण्य राजा नितरां दुःखितस्सन् अहमेवागत्य चिकित्सयामीति तद्गृहं गन्तुमुपचक्रमे. तावत्ते बुधाः स्वरहस्यभेदात्स्वेषामेव हानिस्सम्भवेदित्यालोच्य कुतश्चिन्मार्गाद्राजाभिमुखमागत्य दीर्घं निश्वस्य स्वामिन् स महापण्डितः प्रियदर्शनः स्वर्गस्थोभूदिति निवेदयामासुः. राजा बहुशश्शोचित्वा मृतकलेबरं वा पश्येयमिति गन्तुमारभत. तदा ते राजानं प्रति भोः मूर्धाभिषिक्तस्य ते शवदर्शनमनुचितमित्युक्त्वा तं गृह एव न्यरुन्धन्. ततः केषु चिन्मासेषु गतेषु स प्रियदर्शनस्तदीयं तन्त्रं विज्ञाय कयापि विधया राजानं दृष्ट्वा एतत्कापट्यं निवेदनीयमिति निश्चित्य राजागमनमार्गे कञ्चित्तरुमारुह्य गूढमतिष्ठत्. कदाचिद्राजनि तन्मार्गे समागतवति प्रभो, प्रियदर्शनोहमागच्छामि, मदागमनपर्यन्तं तत्र तिष्ठतिष्ठेत्यब्रवीत्. तच्छ्रुत्वा तं दृष्ट्वा च राजा किमिदमापतितमिति समीपस्थितान् बुधानेवापृच्छत्. तदा ते चकितचकिता इव वेपमानास्सन्तः राजानं प्रति स प्रियदर्शनो ब्रह्मराक्षसीभूयात्रैव निवसन्बहून्बाधते, पश्यपश्यायं समीपमागच्छति, ततः कष्टतरं स्यात्, अतस्तावदेव झ-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

डिति दूरं गच्छामेति निवेद्य राजानं भीषयित्वा तेन सह स्वयमप्यधावन्. स पण्डितस्तु विफलमनोरथतया राजा किं कारयेदिति भीत्या च तं देशमेव त्यक्त्वा देशान्तरमगात्. तस्माज्जनाः पण्डिता अपि लोकव्यवहारानभिज्ञाश्चेत् एवं खलैर्वञ्चितास्स्युः. *

## ६८ पराजितराजतन्मन्त्रिणोः कथा

ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतस्सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ॥
भर्तुर्ये प्रलयेपि पूर्वसुकृतासङ्गेन निस्सङ्गया
भक्त्या कार्यधुरां वहन्ति बहवस्ते दुर्लभास्त्वादृशाः ॥

विशालापत्तने सोमदत्तो नाम महाराजः आसीत्. सः क्षात्रधर्मानुसारेण प्रजाः परिपालयन् पूर्णिमाचन्द्र इव सकलजनहृदयानन्दकर आसीत्. अथ कदाचित् दुर्जयोनाम महीपतिः राहुरिवागत्य युद्धे तं जित्वा तदीयां सकलामपि श्रियमात्मसादकरोत्. तेन जितस्स सोमदत्तस्तु स्वपत्नीपुत्रादीनपि विहाय स्वमनुगतेन मन्त्रिणा सह महद्वनपदमशिश्रयत्. तत्र निरुत्साहो निराहारो निर्निद्रश्च भूत्वा दिनेदिने महता व्यसनेन



कृशीभूतस्सन् मुग्ध इव भ्रान्त इव भ्रमन् कदाचिन्मन्त्रिणं प्रत्येवमाहस्म. सखे, निर्भाग्यस्य मम सम्बन्धात् तवाप्येष कष्टसम्बिन्धः समभूत्, मम तु सम्पत्तयः पराधीना आसन्, पत्नीपुत्रादयः परित्यक्ताः, इयमवस्थापि प्राप्ता, किमितो निहितैः प्राणैः शैलात्पतित्वा वा ज्वलन्तं ज्वलनं प्रविश्य वा प्राणांस्त्यक्ष्यामि, इति निगद्यापारे शोकसागरे ममज्ज. तदा मन्त्री स्वामिन्विपदि धैर्यमिति नीतिमालोच्य, (एति जीवन्तमानन्दो नरं वर्षशतादपि) इति गाथामनुचिन्तय, यद्भावि तद्भवतु, प्राणान्परं मा विनाशय, इदं च शृणु, अस्माकं स दुर्जयः यथा रिपुस्तथा तस्याप्येकश्शत्रुरस्त्येव तमुत्थापयामः, मित्रसाहाय्ये सति तव क्षीणस्य शशिनइव क्रमेणाभिवृद्धिस्स्यादेव, इत्याश्वासयामास. ततस्स राजा सोत्सहस्सन् स्वमित्रद्वारा शत्रुं जित्वा स्वराज्यं सम्पाद्य यथापुरं सुखेनावर्तिष्ट. तस्माद्दैववशात्कष्टे प्राप्तेप्यात्मानं संरक्ष्य तन्निवारणोपायमेव चिन्तयेत्. सदमात्याः स्वामिनामेवमुपकुर्वन्ति.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## ६६ हंसबकयोः कथा

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन्खरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥

कृष्णानद्यास्तीरे कोपि शाल्मलीतरुरासीत्. तत्रैको बकः चिरान्निवसति स्म. स कदाचिन्मार्गवशाद्दिवि समीप एव गच्छन्तमेकं हंसमालोक्य एवमाबभाषे. सखे, इत आयाहि, सर्वाङ्गैर्मत्सदृशस्यापि तव चञ्चुचणं परं प्रवालायते, कस्त्वं? कुतस्त्यः? क्व प्रस्थितोसीति. तद्वचनमाकर्ण्य स कलहंसस्तंप्रति भ्रातः श्रूयताम्, अहं मानससरोवरवासी, भूलोके सरितस्सरांसि च सन्द्रष्टुकामः स्वयमितोमुखमागतवानित्यवदत्. स बकस्सखे, तर्हि मानसं नाम ब्रह्मणा निर्मितं अतिरमणीयतरमित्यश्रौषं, विशिष्य कथय कीदृशं तत्कामनीयकमिति पुनःपुनस्तमन्वयुङ्क्त. स चक्राङ्गस्त्वहो बक, मानससरो रामणीयकमशेषतो वक्तुमादिशेषस्याप्यशक्यमेव, तथापि श्रृणु, किञ्चित्कथयामि, तत्रत्याः प्रदेशास्सर्वेपि सुवर्णमयाः, तत्रैवेतस्ततो विहरति मुहु-



लानि तत्कूलानि, अभीप्सितार्थदानदक्षाः तत्तटवृक्षाः, मुहुर्मुहुरनुभूयमानराजराजरमणीजनपदालक्तकरसपानानि तत्सोपानानि, निर्जितामृतसाराणि तन्नीराणि, अहर्निशमात्ममैत्रीकामनानुसरद्दिविचरास्तज्जलचराः, प्रतिकलमधिविधिगौरवात्परितः परिचरत्परमहंसाः तद्राजहंसाःकिमन्यद्वक्तव्यमित्यकथयत्. तद्वचनमाकर्ण्य स बकः सर्वमुपपन्नमेव, तर्हि तत्र मत्स्यकुलीरमण्डूकादयोपि सन्ति किम् इति पप्रच्छ.स,हंसस्तु न ते तत्र लक्ष्यन्ते इत्यवादीत्. तदा स बकः हीही, यन्मृदुमधुरमाहारवस्तु तदेव तत्र नास्ति, शुष्कैरन्यैः किं फलमित्युच्चैः परिजहास. स हंसस्तु त्वत्स्वभावानुरूपं वदसीत्युक्त्वा जगाम. तस्मादेवमविवेकिनः स्वग्राह्यं वस्त्वतिनीचमपि तदेव बहूकृत्य अन्यद्योग्यतममपि न बहुमानयन्ति.

---

## ६७ जम्बुककुक्कुटयोः कथा

दुर्जनः प्रियवादीति नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं ॥

कस्मिंश्चिद्ग्रामे ... कांश्चित्कुक्कुटान्स-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

स्पाद्य स्वनिष्कुटे उन्नतस्थाने नीडानि निर्माय तत्र तान्पोषयन्नासीत्. कस्याञ्चिद्रात्रौ कश्चिज्जम्बुकः तन्निष्कुटं प्रविश्य तानालोक्य भक्षयितुमैषीत्. अथ तन्नीडपर्यन्तं उल्लङ्घनसामर्थ्याभावादुपायेन तान् जिघृक्षुरेवमवादीत्. अये कुक्कुटाः, इतआयात, लालयत मद्वचनं, प्रभाते मृगपक्षिकीटादयस्सर्वेपि तिर्यञ्चः एकत्र सम्मिलन्ति, तदा सर्वैरस्माभिः परस्परजातिवैरादिदुर्गुणान्विहाय इतःपरमन्योन्यसख्यपथादस्खलित्वा सुखेन वर्तितव्यमिति व्यवस्थापयिष्यन्ति, भवतामिमं वृत्तान्तमावेद्य युष्मानानयेति तैः प्रेषितोहमागतोस्मि, झडित्यवतीर्यागच्छत, तत्र गच्छामेति. तद्वचनमाकर्ण्य ते ताम्रचूडाः बुद्धिमत्तया तद्वञ्चनां विज्ञाय तत्रैव स्थित्वा तमेवमवादिषुः. भद्र त्वदुक्तं युक्तमेव तर्हि तत्र पश्य, केचित्सालावृकास्समागच्छन्ति, क्षणं तिष्ठ, तेभ्योप्येतद्वृत्तं कथय, तानपि सहादायैव गच्छामेति. तच्छ्रुत्वा क्षणमात्रादेव स जम्बुको भीतः प्राकंपत. तदा ते कालज्ञास्साधो, अस्माकमेवं बोधकस्त्वं सालावृकेभ्यः कुतो बिभेषीति पप्रच्छुः. स जम्बुकस्तु

Digitised by Ajit Gargeshwari For Karnataka Samskrita University



सेयं वार्ता श्वभिश्श्रुता वा नवा न जाने, तस्माद्बिभेमि, शुनामाह्वानमस्मत्सामाजिकानामिष्टं वा न वा ज्ञात्वा पुनरागमिष्यामीति निगद्य तद्भिया परावृत्य परावृत्य पश्यन् द्रुतपदं जगाम. तस्माद्वञ्चकानां भेदोपायान्विदित्वा पूर्वमेवैवं जागरितारः सुख्यन्ति.

---

### ६८ तेन्नालरामकृष्णस्य ब्राह्मणानां च कथा

* चमत्कारवतां पुंसां नापायैः पीड्यते मनः ।
गगने चरतां पादः पङ्कलग्नः कथं भवेत् ॥

शेषाद्रेरुपत्यकायां चन्द्रगिरिनामकं नगरमस्ति किल, तत्र कृष्णराजो नाम श्रीमानवर्तत. तन्माता मरणकाले रसालफलमपेक्ष्य तदानयनसमकालमेवाम्रियत. स कृष्णराजस्स्वमातुस्सर्वाश्श्रोत्तरक्रियाः क्रमेण निर्वर्त्य ब्राह्मणानाहूय स्वामिनः, मज्जनन्याः रसालफले इच्छा अवर्तिष्ट, सा वाञ्छा न सम्पूरिता मया, तदर्थं किङ्कर्तव्यमित्यपृच्छत्. विप्रास्त्वयमेव द्रव्यसम्पादनसमय इत्यालोच्य श्रीमन्, मृतानां यद्यदभीप्सितं ब्राह्मणमुखे तत्तद्दातव्यं सुवर्णैराम्रफलानि कारयित्वा ब्राह्मणेभ्यो

देहि, तव मातुस्तृप्तिस्स्यादिति बोधयामासुः. स तथैव कारयामास. ते ब्राह्मणाः सुवर्णफलान्यादाय स्वस्वगृहान् जिगमिषवः प्रमोदेन वीध्यां प्रतस्थिरे. तावत्तेन्नालरामकृष्णस्तदृष्ट्वा कृष्णराजसमीपात् क्षिप्रमागत्य स्वगृहद्वारे स्थित्वा वीध्यामागच्छतो ब्राह्मणान्मुहुर्मुहुः प्रणिपत्य स्वामिनः मन्मातुः श्राद्धदिनमिदम् अस्मिन् दिने मद्गृहमपि युष्मत्पादपांसुभिः पवित्रीकुरुतेति सविनयं प्रार्थयामास. तदा ते द्विजास्तद्गृहेपि किमपि लभ्येतेत्याशया तन्मन्दिराभ्यन्तरमविशन्. ततस्स कवाटं पिधायार्गलाभ्यां दृढीकृत्य तान्पङ्क्तिशः उपवेशयामास. अथान्यस्मिन् द्वारे कांश्चिद्दर्वीकाण्डानग्नौ सम्यक्प्रताप्य दक्षिणां ददाम्यायातेति तानेकैकमेवाहूय तप्तेन तेनैकैकेन दाहंदाहं विससर्ज. ते सर्वेपि प्रलपन्तो राज्ञे व्यजिज्ञपत्. स कृष्णराजस्तमाकार्य रे, किमेवमकरोरिति पप्रच्छ. रामकृष्णः प्रणिपत्य प्रभो, केनापि व्याधिना पीडिता मन्माता मरणकाले तप्तायसा दाहमपेक्ष्य अयस्तापनसमकालमेव ममार. तस्माद्ब्राह्मणवचनानुसारेण भवन्मातृप्रीत्यर्थं भवन्तः यथा अकुर्वन्, मन्मातृप्रीत्य-



र्थमहमपि तथैवाकरवमित्यवादीत्. राजा तद्वचनाद्विस्मित्य तान्समाधाय प्रेषयामास. एवं युक्तिशालिनः अनुचितकार्यं कृत्वाप्यनुकूलन्यायं परिकल्प्य स्वात्मानं मोचयन्ति.

## ६९ तेन्नालरामकृष्णस्य राजदौवारिकाणां च कथा.

* प्रगल्भः पुरुषो लोके न शिक्षाभाजनं भवेत् ।
प्रहर्तुं पारदश्शक्यो न दण्डैर्न च मुष्टिभिः ॥

कदाचित्कृष्णराजस्यास्थानं प्रति आन्ध्रदेशात्केचिन्नटास्समाजग्मुः. ते तत्र नाट्यशालां निर्माय कृष्णलीलामधिकृत्य किञ्चिन्नाटकमभिनयन्तः आसन्. राजा त्वतिकुतूहलतया स्वबन्धुभिस्साकं तद्दिदृक्षुरभूत्. तदा स तेन्नालरामकृष्णं दुश्चेष्टापरमालोच्य द्वारपालकान्प्रति आ नाटकसमाप्तेः तमेतन्नाट्यशालां मा प्रवेशयतेत्याज्ञापयत्. एतद्विज्ञाय रामकृष्णस्समागत्य दौवारिकान्प्रति अये, मां राजद्वारं प्रवेशयत, राजसन्निधौ मया यत्सम्पाद्यते तदर्धं युष्मभ्यं दास्ये, इतिद्वारद्वयेप्युक्त्वा कथञ्चित्तान् [illegible] अभ्यन्तरमविक्षत्. तत्र कृष्णभूमि-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

काधरमालोक्य स्वयमतूष्णीकतया यूष्णा तमताडयत्. स नटस्त्वहह कोपि मां ताडयतीत्युच्चैश्चुक्रोश. रामकृष्णस्तं प्रति अये, पुरा कृष्णः कतिभिर्गोपीभिः मन्थानेन कतिवारान्नाताड्यत, एवमेवारोदीत्किम् कुतो रोदिषि ? मा रोदीः, तत्स्वभावाभिनयो लुप्येत, इत्यकथयत्. तावद्राजा रामकृष्णमालोक्य तस्मै क्रुद्धस्सन्नेनं बहिर्नीत्वा चतुर्विंशतिकृत्वः कशया ताडयतेति स्वसेवकानादिक्षत्. ते तमादाय जग्मुः. तावत्प्रतीहारमार्गे सः तान्प्रातिहारिकानालोक्य भवद्भिरन्तःप्रवेश्यमानोहं किं दद्यामित्यवदमित्यकथयत्. तदाकर्ण्य ते धनागमाशापरवशास्सन्तः राजसन्निधौ मया यत्सम्पाद्यते तदर्धं युष्मभ्यं दास्ये, इत्यवदः किल, इत्यवोचन्. तदा स रामकृष्णः तर्हि मया सम्पादितेषु प्रहारेषु एकमर्धमेकस्य द्वार्स्थवर्गस्यान्यदर्धमन्यस्य च दीयतामिति राजसेवकाननुमान्य स्वयं तटस्थोऽभूत्. उपायशालिनः अपराध्याप्येवमात्मानं मोचयन्ति.



### ७० रजकीगायकयोः कथा.

* यस्स्वदोषमविज्ञाय लोभात्कार्ये प्रवर्तते ।
सोऽपमानं भजेद्गायन् रजकीवचनादिव ॥

पुरा कश्चिद्गायकः राजसन्मानापेक्षी सन् देशान्तरं गत्वा कस्यचिद्राज्ञः पुरे किञ्चिद्गृहस्थगृहमधिवसति स्म. तत्र प्रतिदिनमुषसि गायन्नासीत्. एवं स्थिते तत्प्रातिवेशिकी काचिद्रजकी तद्गानमाकर्ण्य तत्समकालमेव प्रतिदिनं रुदत्यासीत्. पञ्चषदिनानन्तरं स तामाहूय कुतो मद्गानसमकालमेव प्रतिदिनेऽपि रोदिषीति पप्रच्छ. सा तु दीर्घं निश्वस्य स्वामिन्किं ब्रवीमि ? निर्भाग्याहं कतिपयमासेभ्यः प्राक् रूप्यपञ्चकं दत्त्वा कञ्चित्खरमक्रैषं, स तावदेकमासात्पूर्वममृत, तदारभ्य तद्व्यसनाकुलाहमस्मि, श्रीमतां कलमधुरकण्ठस्वरे श्रूयमाणे प्रतिदिनमपि मम तद्रासभस्वरः स्मृतिपथमारोहति, तन्मूलमेवेदं रोदनमित्यवादीत्. तच्छ्रुत्वा स गायकः लज्जितः प्रभुमदृष्ट्वैव यथागतं जगाम. एवं स्वदोषमविज्ञाय प्रवृत्ताः स्वयमेवापमानिता भवन्ति.

* समाप्तोऽयं ग्रन्थः. *

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

Printed by R. Y. Shedge, at the Nirnaya-sagar Press,
23, Kolbhat Lane, Bombay.

---

Published by mandikal Ramasastry,
Mysore.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

836
T260

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ P2862

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY
Class J. ~~83~~ 260 Ac. No. 836

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-36 B P.

# विज्ञापना.

पूर्वमुद्रितपुस्तकापेक्षया इदानीं साधुपरिशोध्य तत्रतत्र का।न-चित्पदानि वाक्यानि च ललिततरमन्यथा योजयित्वा पुस्तकमूल्यं च किञ्चिन्न्यू[illegible] बालोपयोगाय सावधानं पञ्चममुद्रणमापादितोयं ग्रन्थः [illegible] त्यन्तोपयुक्तः स्यादेवेति प्रार्थेमि.

अस्मिन् देशे राजकीयपाठशालासु एष ग्रन्थः पठनीय इति समाज्ञप्तवतां बहुपुस्तकग्राहिणां एतद्देशीयविद्याभिवर्धनाधिकार-मुख्याध्यक्षाणां विषये कृतज्ञतामनुवर्ते.

[illegible] र्णाटकाक्षरैः [illegible] वर्तते तन्मूल्यं = कलात्रयम्. किञ्च देवनागराक्षरैः मुद्रिता आर्यधर्मप्रकाशिका च वर्तते. तन्मूल्यं द्वादशकलाः.

इमानि पुस्तकानि मन्निकटे राजकीयनिषद्यायां [illegible] यन्ते. दशपुस्तकग्राहिणामेकं पुस्तकं पारितोषिकतया [illegible] च.

**मण्डिकल् रामशास्त्री,**

मैसूरु॰ चामराजाग्रहारस्थः.